

ॐ नमः परदेवतायै[1]

कामाख्यातन्त्रम्

प्रथमः पटलः

ॐ नमः कालिकायै। श्रीकामाख्या जयति ॥[2]

श्रीदेव्युवाच –

भगवान् सर्वधर्मज्ञ सर्वविद्याधिप[4] प्रभो।
सर्वदानन्दहृदय सर्वागम-विकाशक ॥ १ ॥
श्रुतानि सर्वतन्त्राणि यामलानि[5] च भूरिशः।
विद्यास्ताः सकला देव सफला[6]स्त्वत्प्रसादतः ॥ २ ॥
सारात् सारतरं तन्त्रं[7] किं जानासि वद प्रभो।
अतीवेदं[8] रहस्थानं[9] तेन मे शुश्रुषा सदा[10] ॥ ३ ॥

श्रीशिव उवाच—

शृणुदेवि प्रवक्ष्यामि मदीये प्राणवल्लभे[11]।
योनिरूपा महाविद्या कामाख्या वरदायिनी ॥ ४ ॥
वरदानन्ददा नित्या महाविभववर्द्धिनी।
सर्वेषां जननी सापि सर्वेषां तारिणी मता ॥ ५ ॥
रमणी चैव सर्वेषां स्थूला सूक्ष्मा शुभा सदा।
तस्यास्तन्त्रं प्रवक्ष्यामि सावधानावधारय ॥ ६ ॥
निखिलासु च विद्यासु यासु सिध्यन्ति साधकाः।
यत्र कुत्रापि केनापि कामाख्या फलदायिनी ॥ ७ ॥
कामाख्या सिद्धिदा तेषां सर्वविद्या स्वरूपिणी[12]।
कामाख्या-विमुखालोका निन्दिता भुवनत्रये ॥ ८ ॥

---

१. अधिकः पाठः। २. तन्त्रे। ३. अधिकः पाठः। ४. विद्याप्रिय।
५. साधनानि। ६. फलानि त्वत्। ७. मन्त्रं। ८. अतिप्रियम्।
९. रहसिस्थं। १०. तेनाहं श्रवणोद्यता। श्रवणे स्थिता। ११. मदीयप्राणवल्लभे।
१२. अधिकः पाठः।

विना कामात्मिकां क्वापि न दात्री सिद्धिसम्पदाम् ।
कामाख्यैव[१३] सदा धर्मः कामाख्या चार्थ एव च ॥ ९ ॥
कामाख्या कामसम्पत्तिः कामाख्या मोक्ष एव च ।
निर्वाणं सैव[१४] देवेशि सैव सायुज्यमीरिता [१५] ॥१०॥
सालोक्यं सहरूपञ्च कामाख्या परमा गतिः ।
सेविता ब्रह्माद्यैर्देवि[१६] चन्द्रेण[१७] विष्णुना तथा ॥११॥
देवत्वं सर्वदेवानां निश्चितं कामरूपिणी ।
सर्वासामपि विद्यानां लौकिकं[१८] वाक्यमेव च[१९] ॥१२॥
कामाख्याया महादेव्याः स्वरूपं सर्वमेव हि ।
पश्य पश्य प्रिये सर्वं चिन्तयित्वा हृदि स्वयम् ॥१३॥
कामाख्यां न विना किञ्चिद् विद्यते भुवनत्रये[२०] ।
लक्षकोटिमहाविद्यास्तन्त्रादौ[२१] परिकीर्त्तिताः ॥१४॥
सारात्सारतरं देवि सर्वेषां षोडशी मता ।
तस्यापि[२२] कारणं देवि कालिका जगदम्बिका ॥१५॥
चन्द्रकान्तिर्यथा[२३] देवि जायते लीयते पुनः ।
स्थावराणि चराणि च नित्यानित्यानि यानि च ॥१६॥
सत्यं सत्यं पुनः सत्यं विना तां नैव जायते ॥१७॥

इति कामाख्यातन्त्रे शिवपार्वतीसंवादे प्रथमः पटलः ॥

द्वितीयः पटलः

मन्त्रोद्धारः[१]

श्रीशिव उवाच—

मन्त्रोद्धारं प्रवक्ष्यामि शृणु देवि परात् परम् ।
यज् ज्ञात्वा जायते सिद्धिं देवानामपि दुर्ल्लभाम्[२] ॥ १ ॥
मन्त्रस्यास्य प्रभावेण[३] मोहयेदखिलं जगत् ।
ब्रह्मादीन् मोहयेद्देवि बालकं[४] जननी[५] यथा ॥ २ ॥

१३. कामाख्या च । १३a. 'विनाकामातिकाम्' इत्यारभ्य 'चार्थ एव च' इत्यन्तं पाठः अपरत्र नास्ति १४. सर्वं । १५. ईरितम् । १६. ब्रह्मता देवि । १७. चन्द्रता । १८. लौकिकां । १९. अस्ति च । २०. भुवनेषु च । २१. तन्त्रादौ, स्वतन्त्रादौ । २२. तस्याश्च । २६. यंदा ।

१. अधिकः पाठः । २. दुर्लभम् । ३. प्रतापेन । ४. बालको । ५, जननीं ।

देवदानवगन्धर्व[६]किन्नारादीन् सुरेस्वरि ।
मोहयेत् क्षणमात्रेण प्रजाश्च[७] नृपतिर्यथा ॥ ३ ॥
मन्त्रस्य पुरतो देवि राजानः[८] सचिवादयः ।
अन्ये च मानवाः सर्वे मेषादि जन्तवो यथा ॥ ४ ॥
मोहयेन्नगरं राज्ञः[९] सहस्त्यश्वरथादिकम् ।
उर्वश्याद्यास्तु स्वर्वेश्या राजपत्न्यादिकाः क्षणात्[१०] ॥ ५ ॥
स्तम्भनं मोहनं[११] देवि क्षोभणं जृम्भणं तथा ।
द्रावणं[१२] त्रासनञ्चैव विद्वेषोच्चाटनं तथा ॥ ६ ॥
आकर्षणञ्च नारीणां विशेषेण महेश्वरि ।
वशीकरणमन्यानि साधयेत् साधकोत्तम ॥ ७ ॥
अग्निः स्तम्भति वायुश्च सूर्यो वारिसमूहकः[१३] ।
कटाक्षेणैव[१४] सर्वाणि साधकस्य न चान्यथा ॥ ८ ॥
जगज्जयति मन्त्रज्ञः कामदेवो यथा जयी ।
तस्यासाध्यं त्रिभुवने न किञ्चित् प्राणवल्लभे ॥ ९ ॥
जृम्भणान्तं त्यक्तपाशं यात्रावारणरोहकम्[१५] ।
वर्ग्यवर्णयुतं[१६] देवि नादबिन्दुयुतं पुनः ॥१०॥
एतत्तु त्रिगुणीकृत्य कल्पवृक्षममुं जपेत् ।
एकं वापि द्वयं[१७]वापि चतुर्थं वा जपेत्[१८] सुधीः ॥ ११ ॥
कामाख्या-साधनं कार्यं सर्वविद्यासु साधकैः ।
अन्यथा सिद्धिहानिः[१९] स्यात् विघ्नस्तेषां पदे पदे ॥ १२ ॥
किं शाक्ता वैष्णवाः किंवा किं सौरा[२१] गाणपत्यकाः ।
महामायाव्रताः[२०] सर्वे तैलयन्त्रे वृषा इव ॥ १३ ॥
अथास्याः साधनं देवि शाक्तानामेव सुन्दरि ।
नात्र चक्रविशुद्धिस्तु कालादिशोधनं न च ॥ १४ ॥
कृते च नरकं याति सर्वं तस्यः विनश्यति ।
क्लेशशून्यं परं देवि साधनं द्रुतबोधकम्[२२] ॥ १५ ॥

इति श्रीकामाख्यातन्त्रे शिवपार्वतीसंवादे द्वितीयः पटलः[२३] ॥

६. गन्धर्वान् । ७ः प्रजासु । ८. राजानं । ९. राज्यं । १०. राजपत्न्यादिकटाक्षणात् । ११. मारणं । १२. दावनं । १३. समुद्रकः । १४. कटाक्षेण च । १५. रोहणम् । १६. व्यंगवर्णं । १७. त्रयं । १८. वापि सञ्जपेत् । ५९. नैव सिद्धिः । २०. युताः । २१. शैवा । २२. ·····पोशकम् २३. वाराणसीमद्रणे अत्र पटलसमाप्तिर्नास्ति ।

तृतीयः पटलः

श्रीदेव्युवाच—

कालीतारागमन्त्रदाने चक्रचिन्तां करोति यः।
का गतिस्तस्य देवेश निस्तारो विद्यते न वा[1] ॥ १ ॥

श्रीशिव उवाच—

वयमग्निश्च कालोऽपि या या माता[2] महेश्वरि।
किं ब्रूमो देव देवेशि कालिकातारिणीमनुम् ॥ १ ॥
अज्ञानात् यदि वा मोहात् कालीतारामनौ प्रिये।
कृते चक्रादिगणने शूनीविष्ठाकृमिर्भवेत् ॥ ३ ॥
कल्पान्ते[4] च महादेवि निस्तारो विद्यते न च।
तस्याः पूजां प्रवक्ष्यामि त्रैलोक्यसाधनप्रदाम् ॥ ४ ॥
हठाद्धठाच्च[5] देवेशि या या सिद्धिश्च जायते।
प्राप्यते तत्क्षणेन्नैव नात्र कार्या विचारणा ॥ ५ ॥
सिन्दूरमण्डलं कृत्वा त्रिकोणञ्च समालिखेत्।
निजबीजानि[6] तन्मध्ये योजयेत् साधकोत्तमः ॥ ६ ॥
चतुरस्रं लिखेद्देवि ततो वज्राष्टकं प्रिये।
अष्ट[7] दिक्षु यजेत्ताश्च न्यासजालं विधाय च ॥ ७ ॥
अक्षोभ्यश्च ऋषिः प्रोक्तः छन्दोऽनुष्टुबुदाहृतम्।
कामाख्या देवता सर्वसिद्धये[8] विनियोजिता[9] ॥ ८ ॥
कराङ्गन्यासकादीनि[10] निजबीजेन कारयेत्।
षड्दीर्घभाजां ध्यायेत्तु कामाख्याभीष्टदायिनीम् ॥ ९ ॥
रक्तवस्त्रां[11] वरोद्युक्तां सिन्दूरतिलकान्विताम्।
निष्कलङ्कां[12] सुधाधाम-वदनकमलोज्ज्वलाम्[13] ॥ १० ॥
स्वर्णादिमणिमाणिक्य-भूषणैर्भूषितां पराम्।
नानारत्नादिनिर्माण-सिंहासनोपरिस्थिताम् ॥ ११ ॥

१. का गतिस्तस्य देवेश। का गतिर्विद्यते तस्य।
२. नयनाग्नि-कामा वापि माया ज्ञाता। स्वयमग्नि-कामा वापि।
३. ··· महम्। कल्पान्ता।
५. हटाकुटाच्च। ६. लीज···। ७. चाष्ट। ८. सिद्धयर्थे।
९. विनियोगकः। विनियोजकः। विनियोगः प्रकीर्तितः। १०. करांगन्यासकं।
११. रक्तवर्णां। १२. निष्कलंकीं। १३. वदनामलकोज्ज्वलां।··· मानिकोज्ज्वलाम्।

हास्यवक्त्रां पद्मराग-मणिकान्तिमनुत्तमाम्।
पीनोत्तुङ्गकुचां कृष्यां श्रुतिमूलगतेक्षणाम् ॥ १२ ॥
कटाक्षैश्च महासम्पद्दायिनीं परमेश्वरीम्[15]।
सर्वाङ्गसुन्दरीं नित्यां विद्याभिः[16] परिवेष्टिताम् ॥ १३ ॥
डाकिनीयोगिनी-विद्याधरीभिः परिशोभिताम्।
कामिनीभिर्युतां नानागन्धाद्यैः परिगन्धिताम् ॥ १४ ॥
ताम्बूलादिकराभिश्च नायिकाभिर्विराजिताम्।
समस्तसिद्धवर्गाणां[17] प्रणतानां प्रतीक्षणाम् ॥ १५ ॥ ५ ॥
त्रिनेत्रां [18]सम्मोहकरां पुष्पचापेषु बिभ्रतीम्।
भंगलिङ्ग-समाख्यानां[20] किन्नरीभ्योऽपि शृण्वतीम्[21] ॥१६॥
वाणीलक्ष्मी-सुधावाक्य-प्रतिवाक्य-महोत्सुकाम्।
अशेषगुणसम्पन्नां करुणासागरां शिवाम् ॥१७॥
आवाहयेत्ततो देवीमेवं ध्यात्वा च साधकः।
पूजयेच्च[23] यथाशक्ति[23] विधानेन हरप्रिये[24] ॥१८॥
कुङ्कुमाद्यैः रक्तपुष्पैः सुगन्धिकुसुमैस्तथा।
जवायावक-सिन्दूरैः करवीरैर्विशेषतः ॥१९॥
करवीरेषु देवेशि कामाख्या तिष्ठति स्वयम्।
जवायाञ्च तथा विद्धि मालत्यादि समीपके ॥२०॥
करवीरस्य माहात्म्यं कथितुं नैव शक्यते।
प्रदानात्तु जवायाञ्च गाणपत्यमवाप्नुयात् ॥21॥
पूजयेदम्बिकां देवीं[25] पञ्चतत्त्वेन सर्वदा।
पञ्चतत्त्वं विना पूजामभिचाराय कल्पते ॥२२॥
पञ्चतत्त्वेन देव्यास्तु प्रसादो जायते क्षणात्।
पञ्चमेन महादेवि[26] शिवो भवति साधकः ॥२३॥
पञ्चतत्त्वसमं देवि नास्ति नास्ति कलौ युगे।
पञ्चतत्त्वं परं ब्रह्म पञ्चतत्त्वं परा गतिः ॥२४॥
पञ्चतत्त्वं महादेवी पञ्चतत्त्वं सदाशिवः।
पञ्चतत्त्वं स्वयं ब्रह्मा पञ्चतत्त्वं जनार्दनः ॥२५॥

१४. तुष्टां। १५. हरमोहिनीम्। १६. सर्वांगानिन्दितां नानाविद्याभिः। सर्वांगरम्यां।
१७. कामां तु सिद्धवर्गाणां। १८. प्रतिक्षणाम्।
१९. मोहनकरीं। २०. समाख्यानं। २१. सुस्थिताम्। २२. पूजयित्वा
२३. यथोक्तेन। २४. हरप्रियाम्। २५. वि। २६. महासाधु।

पञ्चतत्त्वं भुक्तिमुक्तो महायोगः प्रकीर्तितः ।
पञ्चतत्त्वेन देवशि महापातककोटयः ॥२६॥
नश्यन्ति तत्क्षणेनैव तृणराशिमिवानलः[२७] ।
यत्रैव पञ्चतत्त्वानि तत्र देवी वसेद्ध्रुवम् ॥२७॥
पञ्चतत्त्वविहीने तु विमुखी जगदम्बिका ।
पञ्चतत्त्वं विना नान्यत् शाक्तानां सुखमोक्षयोः ॥२८॥
शैवानां वैष्णवानाञ्च शाक्तानाञ्च विशेषतः[२८] ।
मद्येन मोदते स्वर्गे मांसेन मानवाधिपः ॥२९॥
मत्स्येन भैरवीपुत्रो मुद्रया धातृतां[२९] व्रजेत् ।
परेण च महादेवि सायुज्यं लभते नरः ॥३०॥
भक्तियुक्तो यजेद् देवीं[३०] तदा सर्वं प्रजायते ।
स्वयम्भूकुसुमैः शुक्लैः[३१] कुण्डगोलोद्भवैः शुभैः ॥३१॥
कुङ्कुमाद्यैरासवेन चार्घ्यं देव्यै निवेदयेत्[३२] ।
नानोपहारैर्नैवेद्यैरन्नाद्यैः[३३] पायसैरपि ॥३२॥
वस्त्रभूषादिभिर्देवीं[३४] प्रपूज्यावरणं यजेत् ।
इन्द्रादीन् पूजयेत्तत्र तेषां यन्त्राणि शाङ्करि ॥३३॥
पार्श्वयोः कमलां वाणीं पूजयेत्साधकोत्तमः ।
क्षेमदारोग्यदा चैव शुभदा धनदा तथा ॥३४॥
वरदामोहदा देवि[३५] ऋद्धिदा सिद्धिदापि च ।
बुद्धिदा शुद्धिदा चैव भुक्तिदा मुक्तिदा तथा ॥३५॥
मोक्षदा सुखदा चैव ज्ञानदा कान्तिदा तथा ।
एताः पूज्या महादेव्यः सर्वदा यन्त्रमध्यतः ॥३६॥
डाकिन्याद्यास्तथापूज्याः सिद्धयो यत्नतः शिवे ।
षडङ्गानि ततो देव्या यजेत् पुष्पाञ्जलिं क्षिपेत् ॥३७॥
यथाशक्ति जपेन्मन्त्रं शुद्धभावेन साधकः ।
जपं समर्प्य वाद्याद्यै[३६]स्तोषयेत् परदेवताम्[३७] ॥३८॥

---

२७. तूलराशिमिवा । २८. 'पञ्चतत्त्वम्' इत्यारभ्य 'विशेषतः' इत्यन्तः पाठोऽधिकः ।
२९. साधुतां । ३०. भवेद् देवि । ३१. शुद्धैः । ३२. दद्यान्मनोहरम् ।
३३. दुग्धाद्यैरन्नादि ३४. देवि । ३५. अन्नदा धनदा चैव सुखदा (पूतना) जयदा (वरदा) तथा । रसदा मोहदा देवि । ३६. पाद्याद्यैः ।
३७. परमेश्वरीम् ।

पठेत् स्तोत्रञ्च कवचं प्रणमेद् विधिवन्मुदा[३८] ।
ततश्च हृदये देवीं संयोज्य शैषिकां[३९] प्रति ॥३९॥
निर्माल्यं निक्षिपेदंशे त्रिकोणं परिकल्पयेत्[४०] ।
निर्माल्यं साधकैः साधं गृह्णीयाद्भक्तिभावतः ॥४०॥
विहरेत् पञ्चतत्त्वेन यथाविधि स्वशक्तितः ।
शक्तिमूलं साधनञ्च शक्तिमूलं जपादिकम् ॥४१॥
शक्तिमूला गतिश्चैव शक्तिमूलञ्च जीवनम् ।
ऐहिकं शक्तिमूलञ्च पारत्रं शक्तिमूलकम् ॥४२॥
शक्तिमूलं तपः सर्वं चतुर्वर्गस्तथा प्रिये ।
शक्तिमूलानि सर्वाणि स्थावराणि चराणि च ॥४३॥
अज्ञात्वा पापिनो देवि रौरवं यान्ति निश्चितम्[४१] ।
तस्मात् सर्वप्रयत्नेन साधकैश्च शिवाज्ञया ॥४४॥
शक्त्युच्छिष्टं भक्षितव्यं[४२] चान्यथा[४३] यान्ति रौरवम् ।
शक्त्यै यद् दीयते देवि तत्तु देवार्पितं भवेत् ॥४५॥
सफलं तस्य तत् कर्म सत्यं सत्यं कुलेश्वरि ।
शक्तिं विना कौलचक्रं[४४] करोति कारयेदपि ॥४६॥
स याति नरकं घोरं निस्तारो नहि विद्यते ।
एवञ्च पूजयेद् देवीं यं यं चोद्दिश्य[४५] साधकः ॥४७॥
तं तं कामं करे कृत्वा प्रिये जयति[४६] निश्चितम् ।
पुरश्चरणकाले तु लक्षमेकं[४७] जपेत् सुधीः ॥४८॥
तद् दशांशं हुनेदाज्यैः शर्करामधुपायसैः ।
तर्पयेत्तद्दशांशैश्च[४८] जलैश्चन्दनमिश्रितैः ॥४९॥
गन्धाद्यैः साधकाधीशस्तद् दशैरभिषेचयेत् ।
अभिषेकदशांशेन भोजयेच्च द्विजोत्तमान् ॥५०॥
मिष्टान्नैः साधकान् देवि देवीभक्तांश्च पञ्चमैः ।
एवं पुरस्क्रियां कृत्वा सिद्धो भवति साधकः[४९] ॥५१॥
प्रयोगेषु[५०] ततो देवि योग्यो भवति निश्चितम् ।
एतत् पूजादिकं सर्वं कामाख्याप्रीतिकारकम् ॥५२॥

---

३८. विधिना मुदा । ३९. शषिकान् । ४०. परिकल्प्य च । ४१. निश्चयम् ।
४५. पीयते हि । ४३. नान्यथा । ४४. कलौ चक्रं । ४५. वाञ्छति ।
४६. जपति । ४९. लक्षमन्त्रं । ४८. धुदिग्भागैः । ४९. सज्जनः ।
५०. प्रयोगेण ।

महाप्रीतिकरी पूजा योनिचक्रे कुलेश्वरि ।
योनिपूजा महापूजा तत्समा नास्ति[५१] सिद्धिदा ॥५३॥
तत्र देवीं यजेद्धीमान् सैव देवी न चान्यथा ।
आवाहनादि कर्माणि न तत्र सर्वथा प्रिये ॥५४॥
लेपयेत्तां सुगन्धाद्यैः[५२] पूजयेद्विविधेन च ।
महाप्रीतिर्भवेद् देव्याः सिद्धो भवति तत्क्षणात् ॥५५॥
योनिपूजासमा पूजा नास्ति ज्ञाने तु मामके ।
चुम्बनाल्लेहनाद् योनेः[५३] कल्पवृक्षमतिक्रमेत् ॥५६॥
दर्शनात् साधकाधीशः स्पर्शनात् सर्वमोहनः ।
लिंगयोनिसमाख्यानं कामाख्याप्रीतिवर्धनम् ॥५७॥
तदेव जीवनं तस्या गिरिजे बहु किं वचः ।
तस्मात् सर्वप्रयत्नेन योनिपूजां समाचरेत् ॥५८॥
परस्त्रीयोनिमासाद्य विशेषेण यजेत् सुधीः ।
वेश्यायोनिः परा देवि साधनं तत्र कल्पयेत्[५४] ॥५९॥
त्रिरात्रावेव[५५] सिध्यन्ति नात्र कार्या विचारणा ।
ऋतुयुक्त[५६]लतामध्ये साधयेद्विविधान्मुदा ॥६०॥
अचिरात् सिद्धिमाप्नोति देवानामपि दुर्ल्लभाम् ।
सारात् सारतरं देवि योनिसाधनमीरितम् ॥६१॥
विना तत्साधनं देवि महापापः प्रजायते ।
योनिनिन्दां घृणां योनौ[५७] यः करोति नराधमः ॥६२॥
अचिरात् रौरवं याति देवि सत्य शिवाज्ञया ।
योनिमध्ये वसेद् देवी योगिन्यश्चिकुरे स्थिताः[५८] ॥ ६३ ॥
त्रिकोणेषु त्रयो देवाः शिव-विष्णु-पितामहाः ।
तस्मान्न निन्दयेद् योनिं यदीच्छेदात्मनो हितम् ॥ ६४ ॥
योनिनिन्दां प्रकुर्वाणः सवंशेन विनश्यति ।
योनिस्तुतिपरो देवि शिवः स्यात् तत्क्षणेन च ॥ ६५ ॥
किं ब्रमो योनिमाहात्म्यं योनिपूजाफलानि च ।
चाञ्चल्यात् गदितं किञ्चित् क्षन्तव्यं कामरूपिणि ॥ ६६ ॥
इति कामाख्यातन्त्रे देवीश्वरसंवादे तृतीयः पटलः[५९] ॥

५१. न हि । ५२. तां तु गन्धा.... । ५३. योनौ । ५४. कारयेत् । ५५. त्रिरात्रादेव । ५६. ....युक्तं । ५७. देवि । ५८. त्रिकोणेषु' इत्यारभ्य 'पितामहाः' इत्यन्तोऽधिकः पाठः । ५९. द्वितीयः पटलः इति वाराणसीपाठः ।

चतुर्थः[१] पटलः

भैरव उवाच[२]—

वरमन्त्रं[३] प्रवक्ष्यामि सादरं शृणु पार्वति ।
यस्य[४] प्रसादमासाद्य ब्रह्मा-विष्णुशिवा अपि ॥ १ ॥
इन्द्राद्या देवताः सर्वा भजन्ते कामिनीयुताः[५] ।
गन्धर्वाः किन्नरा देवि तथा विद्याधरादयः ॥ २ ॥
यत्प्रसादात् समागत्य[६] स्वकीयविषयान्विताः ।
योगिनी-डाकिनी-विद्या-भैरवो-नायिकादिकाः ॥ ३ ॥
कामाख्यामन्त्र[७]मासाद्य भजन्ति योग्यतां पराम्[८] ।
स्वर्गे मर्त्ये च पाताले ये ये सिध्यन्ति साधकाः ॥ ४ ॥
निजबीजत्रयं देवि क्रोधद्वयमतः परम् ।
वधूबीजद्वयञ्चैव कामाख्यें[९] च पुनर्वदेत् ॥५ ॥
प्रसीदेति पदञ्चैव पूर्वबीजानि कल्पयेत् ।
ठद्वयान्ते मनुः प्रोक्तः सर्वतन्त्रेषु दुर्ल्लभः ॥६॥

[क्रीं क्री क्रीं हुं हुं स्त्रों स्त्रों कामाख्ये प्रसीद । क्रीं क्रीं हुं हुं स्त्रीं स्त्रीं स्वाहा ।]

प्रणवाद्या महाविद्या[१०] त्रैलोक्ये चातिदुर्ल्लभा ।
चतुर्वर्गप्रदा साक्षान् महापातकनाशिनी ॥७॥
स्मरणादेव मन्त्रस्य सर्वे विघ्नाः समाकुलाः ।
नश्यन्ति चानले दीप्ते[११] पतङ्गा इव पार्वति ॥८॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो हि साधकः[११] ।
भुक्तिर्मुक्तिः[५] करे तस्य सर्वेषां प्रियतां व्रजेत् ॥९॥
आवृणोति स्वयं लक्ष्मीर्वदने गीः सदा वसेत्[१२] ।
पुत्राः पौत्राः प्रपौत्राश्च भवन्ति चिरजीविनः ॥१०॥
पृथिव्यां सर्वपीठेषु कामाख्यादिषु शङ्करि ।
सिद्धिश्चलति[१३] तस्यैव नात्र कार्या विचारणा ॥११॥

१. तृतीयः इति वाराणसीपाठः । २. अधिकः पाठः । ३. मन्त्रान् । ४. येषां । ४. भवन्ति कामनायुताः । भजन्ते काममाश्रिताः । ५. समासाद्य । ६. तन्त्रमासाद्य । ७. योग्यताः पराः । ८. कामाख्या । ९. महादेवि । १०. दीपे । ११. भवेच्चर । १२. गीर्वसेद् ध्रुवम् । १३. लिपिश्चलति ।

तस्य नाम च संस्मृत्य प्रणमन्ति सदा जनाः ।
नाम श्रुत्वा वारमेकं पलायन्ते च हिंस्रकाः ।
यावश्यः सिद्धियः सन्ति स्वर्गे मर्त्ये रसातले ॥१२॥
साधकानां परिचर्यां कुर्वन्ति नात्र संशयः ।
तं दृष्ट्वा साधकेन्द्रं च वादी स्खलति तत्क्षणात्[१४] ॥१३॥
सभायां कोटिसूर्याभं पश्यन्ति सर्वसज्जनाः ।
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥१४॥
वर्णितुं नैव शक्नोमि मन्त्रमेकं कुलेश्वरि[१५] ।
न्यासपूजादिकं सर्वं पूर्ववच्च[१६] वरानने ॥१५॥
पुरश्चर्याविधौ किन्तु षट्सहस्रं मनुं जपेत् ।
यथाविधि षट्शतानि[१७] होमादींश्च समाचरेत् ॥१६॥
सिद्धो भवति मन्त्रज्ञः प्रयोगेषु ततः क्षमः ।
ध्यानं शृणु महादेव्या[१८] धन-धान्यसुतप्रदम् ॥१७॥
दारिद्र्यनाशनं देवि क्षणेनैव[१९] न चान्यथा ॥१८॥
अतिसुललितवेशां[२०] हास्यवक्त्रां त्रिनेत्राम् ।
जितजलदसुकान्तिं पट्टवस्त्रां[२१] प्रकाशाम् ॥
अभयवरकराढ्यां रत्नभूषातिभव्याम् ।
सुरतरुतलपीठे रत्नसिंहासनस्थाम् ॥१९॥
हरिहरविधिवन्द्यां शुद्धबुद्धिस्वरूपाम्[२२] ।
मदनशरसमाक्तां[२३] कामिनीं कामदात्रीम् ॥
निखिलजनविलासां कामरूपां[२४] भवानीम् ।
कलिकलुषनिहन्त्रीं योनिरूपां भजामि ॥२०॥
गुह्याद् गुह्यतरं देवि ध्यानं दारिद्र्यनाशनम् ॥२१॥
गोपितं सर्वतन्त्रेषु तव भावात् प्रकाशितम् ॥२२॥
स्वयम्भूकुसुमेनैव[२५] तिलकं परिकल्प्य च ।
तूलिकायां महादेवि कुलशक्तिं समाविशेत् ॥२३॥
कर्पूरपूरितमुखः[२६] साधकश्चुम्बयेन्मुदा ।
तस्यार्धरेफं यथा भृङ्गो नीरजव्याकुलः शिवे[२७] ॥२४॥

१४. तत् क्षणात् । १५. मन्त्रमेतन् महेश्वरि । १६. पूर्वमुक्तं । १७. महेशानि ।
१८. महादेवि । १९. तत्क्षणे । २०. वर्णां । २१. पट्टवस्त्रां ।
२२. बुद्धवृद्धिस्वरूपाम् । २३. मदनशरसंयुक्तां । २४. विलासोल्लासरूपां ।
२५. कुसुमैश्चैव । २६. कर्पूरितमुखः स्वादु । कर्पूरताम्बूलमुखः २७. प्रिये ।

दन्तक्षतिवितानाञ्च परमं तत्र कारयेत्[२८] ।
आलिङ्गयेन्मदोन्मत्तः[२९] सुदृढं कुचमर्दनम् ॥२५॥
नखघातैर्नितम्बे च रमयेद् रतिपण्डितः ।
पुनः पुनश्चुम्बनञ्च योनौ कुर्यात् कुलेश्वरि ॥२६॥
शुक्रन्तु स्तम्भयेत् वीरो योनौ लिङ्गं प्रवेशयेत् ।
आघातैस्तोषयेत्तान्तु सन्धानभेदतः प्रिये ॥२७॥
ततो लिंगे स्थिते योनौ आज्ञां तस्य प्रगृह्य च ।
अष्टोत्तरशतं मन्त्रं जपेद्धोमादिकांक्षया ॥२८॥
दिनत्रयं महावीरः[३०] प्रजपेत् ध्यानतत्परः ।
प्राप्यते मांसं वस्तु नात्र कार्या विचारणा ।
ऋतुयुक्तलतां[३१] देवि निवेश्य तूलिकोपरि ॥३०॥
करवीरप्रसूनञ्च तस्या लिङ्गोपरि न्यसेत् ।
तद्वीक्ष्य देवदेवेशि जपेदष्ट[३२]सहस्रकम् ॥३१॥
दिनत्रयं ततो देव्याः प्रीतिः स्यादचला[३३] प्रिये ।
धनं विन्दति तस्यैव लक्ष्यसंख्यं न संशयः ॥३२॥
आनन्दं वर्द्धते[३४] नित्यं साधकस्य न चान्यथा ।
अष्टोत्तरशतं योनिं संचुम्ब्य पूज्य सज्जनः ॥३३॥
पुनर्लिङ्गे स्थिते योनौ जपेदष्ट[३५]सहस्रकम् ।
काङ्क्षापञ्चगुणं वित्तं प्राप्यते सर्वदा सुखी ॥३४॥
नित्यं तस्य महेशानि नायिकासंगमो भवेत् ।
वेश्यालतां समानीय कुलचक्रं विधाय च ॥ ३५॥
तस्या योनौ यजेद्देवीं हृष्टचित्तेन साधकः ।
भगलिङ्ग-समाख्यानं सुस्वरेण समुच्चरेत्[३६] ॥३६॥
योनिं वीक्ष्य जपेन्मंत्रं सप्तवारमतन्द्रितः[३७] ।
प्रत्यहं त्रिशतं[३८] कृत्वा सोऽपि सिद्धीश्वरः कलौ ॥३७॥
आज्ञां गृह्णाति धनदस्तस्य देवि न संशयः ।
सद्गुरोः स्मरणं[३९] कृत्वा योनेश्च साधनं यदि ।
तदा सिद्धिमवाप्नोति चान्यथा हास्यमेव च ॥३८॥

इति कामाख्यातन्त्रे देवीश्वरसंवादे चतुर्थः पटलः ॥

२८. ..वितानं च परं तत्र च कारयेत् । २९. मदनोन्मत्तां । ३०. महाधीरः ।
३१. ततश्च साधिकां । ३२. जपेच्चाष्ट । ३३. अर्चनात् ३४. वर्द्धयेत् ।
३५. जपेश्चाष्ट । ३६. समाचरेत् । ३७. मतन्त्रितः । ३८. सततं ३९. सद्गुरुस्मरणं ।

पञ्चमः पटलः

श्रीदेव्युवाच—

गुरुतत्त्वं महादेव विशेषेण वद प्रभो।
दुर्वहा गुरुता देव[1] सम्भवेन्मानुषे कथम्[2] ॥ १ ॥
तत्रैव सद्गुरुः को वा श्रेष्ठः[3] को वा वद प्रभो।
दूरीकुरु महादेव संशयं मे महोत्कटम् ॥ २ ॥
इति देव्या वचः श्रुत्वा प्रोवाच शंकरप्रभुः।

शंकर[4] उवाच—

श्रृणु सारतरं ज्ञानं साधूनां हितकारणम् ॥ ३ ॥
गुरुः सदाशिवः प्रोक्त आदिनाथः स उच्यते।
महाकाल्या युतो देवः सच्चिदानन्दविग्रहः ॥ ४ ॥
सनातनः परं ब्रह्म श्रीधर्मस्त्रिगुणः[5] प्रभुः।
तत्प्रसादान्महामाये[6] शिवोऽहमजरामरः ॥ ५ ॥
अत एव गुरुर्नैव[7] मनुजः किन्तु कल्पना।
दीक्षायै साधकानाञ्च वृक्षादौ[8] पूजनं यथा ॥ ६ ॥
मन्त्रदातुः शिरः पद्मे[9] यज्ज्ञानं कुरुते गुरोः।
तज्ज्ञानं[10] शिष्यशिरसि चोपदिष्टं न चान्यथा ॥ ७ ॥
अत एव महेशानि कुतो हि मानुषो गुरुः।
मानुषे गुरुता देवि कल्पना न तु मुख्यता ॥ ८ ॥
अखण्डमण्डलाकारं[11] व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ९ ॥
प्रसिद्धमिति यद्देवि तत्पदं दर्शको नरः।
अत एव नरे देवि गुरुता कल्पनैव हि[12] ॥१०॥

---

१. या तु। २. बहुषु न दृश्यते। ३. भ्रष्टः। ४. ईश्वरः।
५. श्रीधर्मस्त्रिगुणः। ६. महादेवि। ७. गुरुत्वेन। ८. ब्रह्मादौ।
९. मन्त्रदाता शिवः पश्चाद्। १०. तद्ध्यानं। ११. अखण्डमण्डलाकार-मिति मन्त्रद्वयं पठेत्। १२. कल्पनं त्विति।

न तु गुरुः स्वयं न च मुख्यता[13] चोभयोरपि।
अयं गुरुरिति ज्ञानं शिष्योऽयं खलु मे सदा ॥११॥
दर्शकः पठनं[14] नैव न स्वयं मानुषो गुरुः।
मोक्षो न जायते सत्यं मानुषे गुरुभावना ॥१२॥
यथा भोक्तरि भोज्यं हि स्वर्णादि[15] पात्रकेण च।
दीयते च तथा देवि तस्मै सर्वं समर्पणम् ॥१३॥
यदि निन्द्यञ्च[16] तत्पात्रं भग्नं वापि कुलेश्वरि[17]।
तदा त्यजेत्तु तत्पात्रं अन्यपात्रेण तोषयेत्[18] ॥१४॥
अतो हि मनुजं लुब्धं दुष्टं शिष्यं हि संत्यजेत्[19]।
अहंकृतस्तु[20] लाकैर्यस्तत्र रुष्टः सदाशिवः ॥१५॥
राजस्वं दीयते राज्ञे प्रजाभिर्मण्डलादिभिः[21]।
यथा तथैव तस्मै तु शिष्यदानं समर्पणम् ॥१६॥
तत्रैव[22] ग्राहका हिंस्रा मण्डलाद्याः शुभे[23] यदि।
अन्यद्वारेण दातव्यं तांस्तान् संत्यज्य सर्वदा ॥१७॥
सर्वेषां भुवने सत्यं ज्ञानाय गुरुसेवनम्।
ज्ञानान्मोक्षमवाप्नोति तस्मात् ज्ञानं परात् परम् ॥१८॥
अतो यो ज्ञानदातार्हस्तमेव संश्रयेद्[24] गुरुम्।
अन्नाकांक्षी निरन्नश्च यथा संत्यज्यति प्रिये ॥१९॥
ज्ञानं यत्र[25] समाभाति[26] स गुरुः शिव एव हि।
अज्ञानिनं वर्जयित्वा शरणं ज्ञानिनं व्रजेत् ॥२०॥
ज्ञानाद्धर्मो भवेन्नित्यं ज्ञानादर्थो हि पार्वति।
ज्ञानात् कामानवाप्नोति ज्ञानान्मेक्षो हि निर्मलः ॥२१॥
ज्ञानं हि परमं वस्तु ज्ञानं सारतरं हि च।
ज्ञानाय भजते देवं ज्ञानं हि तपसः फलम् ॥२२॥

---

१३. न तु स्वयं गुरुर्ना च मूर्खता। गुरुर्नीच। १४. पटलश्चैव। पटलस्यैव।
१५ पूर्णादि। १६. चिद्यं च। १७ महेश्वरि। १८. अन्य-पात्रं च भोजनम्। १९. लुब्धं दुष्टं सन्त्यजेत्। २०. असम्मतस्तु।
२१.मानुषादिभिः। २२. अत्रैव। २३. स्मृताः। २४. अतो यो ज्ञानदाने हि न क्षमस्तं त्यजेद्। २५. ज्ञानत्रयं। २६. यदा भाति।

के. के. हास्पिटल 219049

मधुलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत्।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ॥२३॥
गुरवो बहवः सन्ति शिष्यवित्तापहारकाः।
दुर्लभः स गुरुर्देवि शिष्यसन्तापहारकः ॥२४॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२५॥
इति ज्ञात्वा[२७] सार्वकेन्द्रो गुरुतां कल्पयेत् सदा।
ज्ञानिन्येव शिष्यभक्ताः केवलं कल्पना[२८] शिवे ॥२६॥
शान्तोदान्तः कुलीनश्च शुद्धान्तःकरणः सदा।
पञ्चतत्त्वार्चको यस्तु सद्गुरुः स प्रकीर्तितः ॥२७॥
सिद्धोऽसाविति विख्यातो बहूभिः शिष्यपालकः।
चमत्कारी दैवशक्त्या सद्गुरुः कथितः प्रिये ॥२८॥
अश्रुतं संवृतं वाक्यं व्यक्ति[२९] साधु मनोहरम्।
तन्त्रं मन्त्रं समं वेत्ति [३०] य एव सद्गुरु सदा[३१] ॥२९॥
शिष्यबोधाय निपुणो हिताय तत्पराय च[३२]।
निग्रहानुग्रहे शक्तः सद्गुरुः परिकीर्तितः[३३] ॥३०॥
परमार्थे सदा दृष्टिः परमार्थ-प्रकीर्तनम्।
गुरुपादाम्बुजे भक्तिर्यस्यैव सद्गुरुर्मतः[३४] ॥३१॥
इत्यादि गुणसम्पत्तिं दृष्ट्वा देवि गुरुं भजेत्[३५]।
त्यक्त्वाक्षमं गुरुं शिष्यो नात्र कार्या विचारणा ॥३२॥
केवलं शिष्यसम्पत्ति-ग्राहको बहुयाचकः[३६]।
व्यङ्गितश्च समं क्षेमो[३७] लोकैर्नित्यो [३८]गुरुर्यतः ॥३३॥
कायेन मनसा वाचा शिष्यभक्तियुतं यदि।
दृष्ट्वानुमोदनं नास्ति यस्य देवि स निन्दितः[३९] ॥३४॥

२७. मत्वा। २८. निश्चितं। २९. व्यक्तं। ३०. वक्ति। ३१. सद्गुरुश्च सः। ३२. सदा यः शिष्यबोधाय (बोधेन) हिताय च समाकुलः। ३३. गीयते बुधैः। ३४. स्मृतः। ३५. व्रजेत्। ३६. मारकः। ३७ समक्षेमो। ३८. निन्द्यः। ३९. तस्य तद् वस्तुकामदः।

Shailendra Nathani
M.D. (Ayurveda)
Clinic & Multan Health Clinic

कर्मणा गर्हितेनैव हन्ति शिष्यधनादिकम्।
शिष्याहितैषिगं लोके वर्जयेत् तं नराधमम् ॥३५॥
महाविद्यां समादाय वीराचारं ददाति च[४०]।
स याति नरकं घोरं शिष्योऽपि पतितो ध्रुवम् ॥३६॥
पशुभावे स्थितो यो हि कालिकातारिणी-मनुम्।
दत्वाचष्टे वदेन्नैव नरकान्न निवर्तते ॥३७॥
तस्मात् पशुगुरुस्त्याज्यः साधकैः सर्वदा प्रिये।
पशोर्दीक्षाधमा प्रोक्ता चतुर्वर्ग-विघातिनी ॥३८॥
यदि दैवात् पशोर्दीक्षां लभते शक्तिमान्नरः।
कौलात्तु कौलकीं प्राप्य तन्मनुं पुनरालभेत् ॥३९॥
तदा विद्या प्रसन्ना स्यात् फलदा जननी समा।
अन्यथा विमुखी देवी [४१]कुतस्तस्यैव सद्गतिः ॥४०॥
पूर्वोक्तदोषयुक्तश्च दिव्यो वा वीर एव च।
तयोरपि न वर्तव्यं[४२] शिष्येण गुरुभावनम्[४३] ॥४१॥
किन्तु भाव्यं हितैषित्वं गुरुताकल्पनां त्यजेत्।
दिव्ये वीरे वरारोहे[४४] न दोषोऽत्र शिवाज्ञया ॥४२॥

वीरवरे वापि

श्रीदेव्युवाच—

दिव्यतो वीरतो देव पशुत्वं किं विशेषतः[४५]।
वद मे परमेशान श्रोतुमिच्छामि शंकर[४६] ॥४३॥

श्रीशिव उवाच—

शृणु देवि जगद्वन्द्ये यत् पृष्टं तत्त्वमुत्तमम्।
दिव्यः सर्वमनोहारी सत्यवादी[४७] स्थिरासनः ॥४४॥
गम्भीरः शिष्यवक्ता[४८] च स भावध्यानतत्परः[४९]।
गुरुपादाम्बुजे भीरुः सर्वत्र भयवर्जितः ॥४५॥

४०. न। ४१. हता। ४२. कर्तव्या। ४३. गुरुभावना। ४४. वीरवरे वापि। ४५. विशेषकः। ४६. मे चित्तमुत्सुकम्। ४७. मितवादी। ४८. श्लिष्ट। ४९. शतावधानकः सुखी।

सर्वदर्शी सर्ववक्ता सर्वदुष्टनिवारकः।
सर्वगुणान्वितो दिव्यः सोऽहं किं बहुवाक्यतः[५०] ॥४६॥
निर्भयोऽभयदो वीरो गुरुभक्तिपरायणः।
वाचालो[५१]बलवान् शुद्धः पञ्चतत्त्वे सदा रतिः॥४७॥
महोत्साहो महाबुद्धिर्महासाहसिकोऽपि च[५२]।
महाशयः सदावीरो साधूनां पालने रतिः[५३] ॥४८॥
तत्त्वमयः[५४] सदावीरो विनयेन महोत्सुकः।
एवं बहुगुणैर्युक्तो वीरोरुद्रसमः[५५] प्रिये ॥४९॥
पशून् शृणु वरारोहे[५६] सर्वदेव-बहिष्कृतान्।
अधमान् पापचित्तांश्च पञ्चतत्त्वविनिन्दकान् ॥५०॥
केचिच्छागोपमा देवि केचिन्मेषोपमा भुवि[५७]।
केचित् खरोपमा भ्रष्टाः[५८] केचिच्च शूकरोपमाः ॥५१॥
इत्याद्या पशवो देवि ज्ञेया दुष्टा नराधमाः!
एषां देव्यर्चनं सिद्धिर्गणनं वा कुतो भवेत् ॥५२॥
ततो हि पंशवश्छेद्या भेद्या[५९] खड्गेन वीरकैः।
वर्जिताः सर्वथा भद्रे परमार्थबहिष्कृताः ॥५३॥

श्रीदेव्युवाच—

किं चित्रं[६०] कथितं नाथ सन्देहः प्रबलीकृतः[६१]।
क्षुद्रो हि पशुभावश्च गदितोऽयं स्वयं सदा[६२] ॥५४॥
अर्चितं पशुभावेन परं[६३] साधारणं यदि।
देवता नैव जानाति तस्मात् समर्पितं नहि ॥५५॥
भञ्ज भञ्जाशु सन्देहं करुणासागर प्रभो।
सूर्यो यथा सदा हन्ति चान्धकारं क्षणादपि ॥५६॥

---

५०. ब्रह्मवाक्यतः। ५१. विशालो। ५२. साहसिकः शूचिः। ५३, महायशः सदा देवि साधूनां पालने रतः। ५४. तमोमयः। ५५. स्वयं। ५६. मेहादेवि। ५७. इह। ५८. दृष्टाः। ५९ मेध्याः। ६०. किं चित्रु। विचित्रं। ६१ प्रचलीकृतः। ६२. कथितोऽयं न सन्देहः। ६३. वरं।

श्रीशिव उवाच—

भद्रमुक्तं त्वया विज्ञे[६४] तत्वन्तु शृणु विस्तरम्[६५]।
य उक्तः पशुभावो हि कलौ कस्तदुपासकः[६६] ॥५७॥
पञ्चतत्त्वं न गृह्णाति तत्र निन्दां करोति न।
शिवेन कथितं यत्र तत् सत्यमिति भावयन्[६७] ॥५८॥
निन्दासु तारयेल्लोकान् निन्दासु भयविह्वल।
निन्दायां पातकं वेत्ति पाशवः संप्रकीर्तितः[६८] ॥५९॥
तस्याचारं वदाम्याशु शृणु संशयनाशकम्[६९]।
हविष्यं भक्षयेन्नित्यं ताम्बूलं न स्पृशेदपि ॥६०॥
ऋतुस्नातां विना नारीं काम-भावे न संस्पृशेत्[७०]।
परस्त्रियं कामभावाद् दृष्ट्वा स्वर्णं समुत् सृजेत् ॥६१॥
संत्यजेत् मत्स्यमांसानि पशुश्च नित्यमेव च।
गन्धमाल्यानि वस्त्राणि चीराणि प्रभजेन्न हि[७१] ॥६२॥
देवालये सदा तिष्ठेदाहारार्थं गृहं व्रजेत्।
कन्यापुत्रादिवात्सल्यं कुर्यान्नित्यं समाकुलः ॥६३॥
ऐश्वर्यं प्रार्थयेन्नैव यद्यस्ति तन्तु न त्यजेत्।
सदा दानं समाकुर्यात् यदिसन्ति धनानि च ॥६४॥
कार्पण्यं नैव कर्त्तव्यं यदीच्छेदात्मनो हितम्[७२]।
सेवनं परमं कुर्यात् पित्रोर्नित्यं समाहितः ॥६५॥
परनिन्दां परद्रोहानहङ्कारादिकान् क्षिपेत्[७३]।
विशेषेण महादेवि क्रोधं संवर्जयेदपि ॥६६॥
कदाचिद् दीक्षयन्नैव पशूंश्च परमेश्वरि।
सत्यं सत्यं पुनः सत्यं नान्यथा वचनं मम ॥६७॥
अज्ञानाद् यदि वा मोहात्[७४] मन्त्रदानं करोति यः।
सत्यं सत्यं महादेवि देवीशापः प्रजायते ॥६८॥
इत्यादि वहुधाचारः कथितोऽयं[७५] पशोर्मतः[७६]।
तथापि न च मोक्षः स्यात् सिद्धिर्नैव कदाचन ॥६९॥

---

६४. भद्रे। ६५. संस्कृतम्। ६६. पालकः। ६७. भावयेत्। ६८. पशवः संप्रकीर्तिताः। ६९. नाशनम्। ७०. कामभावैनं संस्पृशेत् ७१. न च। ७२. कार्यद्रोहान् क्षिपेत् सर्वानहंकारादिकांस्ततः। ७३. सेवनम् इत्यारभ्य क्षिपेत् इत्यन्तः पाठोऽधिकः। ७४. लोभात्। ७५. क्वाचिद्ग्रन्थेषु। ७६. ....र्मतः।

यदि चंक्रमणे शक्तिः[७७] खड्गधारे सदा नरः।
पञ्चाचारं[७८] सदा[७९] कुर्यात् किन्तु सिद्धिर्न जायते ॥७०॥
जम्बुद्वीपे कलौ देवि ब्राह्मणो हि विशेषतः[८०]।
पशुर्न स्यात् पशुर्न स्यात् पशुर्न स्यात् शिवाज्ञया ॥७१॥
सत्ये क्रमेच्चतुर्वर्णैः[८१] क्षीरजैर्मधु पायसैः[८२]।
त्रेतायां पूजिता देवी घृतेन सर्वजातिभिः ॥७२॥
मधुभिः सर्ववर्णैश्च पूजिता द्वापरे युगे।
पूजनीया कलौ देवी केवलैरासवैश्च तु[८३] ॥७३॥
नानुकल्पः कलौ दुर्गे नानुकल्पः कलौ युगे।
न सन्देहो न सन्देहो न सन्देहेः कलौ युगे ॥७४॥
सत्यमेतत् सत्यमेतत् ~~सत्यमेतच्छि~~ वोदितम्। सत्यमेतच्छिवोदितम्
सद्गुरोः शरणं गत्वा[८४] कुलाचारं भजेन्नरः ॥७५॥
दिव्यत्वं लभते किम्वा वीरत्वं लभते शुभे।
असाध्यं साधयेद्वीरोऽप्यनायासेन यद्भुवि ॥७६॥
वीरत्वं क्लेशतो देवि प्राप्नोतीह न चान्यथा।
पशुकल्पशतैर्वापि साधितं न च तत्क्षमः ॥७७॥
लङ्घितुं नैव शक्नोति यथा पंगुर्गिरिं क्वचित्।
अति गुह्यमिदं प्रोक्तं रहस्यं त्वयि सुन्दरि ॥७८॥
गोपनीयं गोपनीयं गोपनीयं सदानघे ॥७९॥
इति कामाख्यातन्त्रे देवीश्वरसंवादे पञ्चमः पटलः ॥

षष्ठः पटलः

श्रीदेव्युवाच—

कस्या देव्याः साधकानमेकात्त-निन्दनं[१] महत्।
न कृत्वा पञ्चतत्त्वेन पूजनं परमेश्वर ॥१॥

श्रीशिव उवाच—

कलौ तु सर्वशाक्तानां ब्राह्मणानां विशेषतः।
पञ्चतत्त्वविहीनानां निन्दनं परमेश्वरि ॥२॥

७७. शक्तः। ७८. पंचाचारं। ७९. तदा। ८०. कदाचन
८१. वर्गैः। ८२. पिष्टकैः। ८३. रासवैः भवैः। ८४. नीत्वा।

१. .....मेकत्वं निर्गयं महत्।

तन्मध्ये कालिकातारा-साधनानां कुलेश्वरि।
मद्यं विना साधनञ्च महाहास्याय कल्पते ॥३॥
यथा दीक्षां विना देवि साधनं हास्यमेव हि।
तथानयोः[२] साधनानां ज्ञेयं तत्त्वं विना सदा ॥४॥
शिलायां शस्यवापेश्च न भवेदङ्कुरो यथा।
अनावृष्ट्या क्षितौ देवि शस्यञ्चैव[३] यथा नहि ॥५॥
ऋतुं विना स्त्रिया देवि कुतोऽपत्यं प्रजायते।
गमनञ्च विना देवि ग्रामं प्राप्तिर्यथा नहि ॥६॥
अतो देव्याः साधने तु पञ्चतत्त्वं सदा[४] लभेत्।
पञ्चतत्त्वैः साधकेन्द्रः साधयेद् विधिना मुदा ॥७॥
मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि।
स्त्रीभिः सार्धं सदा साधुरर्चयेत् जगदम्बिकाम् ॥८॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत् ॥९॥
कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम्।
न करोति नरो यस्तु स कलौ पतितो भवेत् ॥१०॥
वैदिकी-तान्त्रिकी-सन्ध्या-जपहोम[५]-वह्निष्कृतः।
अब्राह्मणः स एवोक्त स एव ह्यस्तिमूर्खकः ॥११॥
शूनीमूत्रसमं तस्य तर्पणंयत् पितृष्वपि[६]।
अतो न तर्पयेत् सोऽपि यदीच्छेदात्मनो हितम्[७] ॥१२॥
कालीतारामनुं प्राप्य वीराचारं करोति न।
शूद्रत्वं तच्छरीरेण[८] प्राप्तं तेन न चान्यथा ॥१३॥
क्षत्रियोऽपि तथा देवि वैश्यश्चाण्डालतां व्रजेत्।
शूद्रोहि[९] शूकरत्वञ्च याति याति न संशयः ॥१४॥
अवश्यं ब्राह्मणो नित्यं राजा वैश्यश्च शूद्रकः।
पञ्चतत्त्वैर्भजेद्देवीं न कुर्यात् संशय क्वचित् ॥१५॥
पञ्चतत्त्वैः कलौ देवि पूजयेद् यः कुलेश्वरीम्।
तस्यासाध्यं त्रिभुवने न किञ्चिदपि विद्यते ॥१६॥
स ब्राह्मणो वैष्णवश्च स शाक्तो गाणपतोऽपि च।
शैवः स परमार्थी च स एव पूर्णदीक्षितः ॥१७॥

२. तथा तयोः। ३. कर्षणं। ४. विना। ५. वैदिकीं तान्त्रिकीं सन्ध्यां जपेद्होम ...।
६. विधि पार्वति। ७. आत्मनः शुभम्। ८. शरीरे तु। ९. शूद्रोऽपि।

स एव धार्मिकः साधुर्ज्ञानी चैव महाकृतो।
याज्ञिकः सर्वकर्माहः सोऽपि[१०] देवो न चान्यथा ॥१८॥
पावनानीह तीर्थानि सर्वेषामिति सम्मतम्।
तीर्थानां पावनः कौलो गिरिजे बहु किं वचः ॥१९॥
अस्यैव जननी धन्या धन्या हि जनकादयः।
धन्या जातिकुटुम्बाश्च धन्या आलापिनो जनाः ॥२०॥
नृत्यन्ति पितरः सर्वे गाथां गायन्ति ते मुदा।
अपि कश्चित् कुलेऽस्माकं कुलज्ञानी भविष्यति ॥२१॥
तदा योग्या भविष्यामः कुलीनानां सभातले।
समागन्तुमिति ज्ञात्वा सोत्सुकाः पितरः परे ॥२२॥
कुलाचारस्य माहात्म्यं किं ब्रूमः परमेश्वरि।
पञ्चवक्त्रेण देव्या हि[११] सनातन्याः[१२] फलानि च ॥२३॥

श्रीदेव्युवाच—

साधनं वद कौलानां[१३] साधकानां सुखावहम्।
दिव्यं रम्यं मनोहारि सर्वाभीष्टफलप्रदाम् ॥२४॥

श्रीशिव उवाच—

शृणु कामकले कान्ते[१४] साधकस्य सुखावहम्।
यत्किञ्चित् गदितं पूर्वं विस्तृतं तद् वदाम्यहम् ॥२५॥
अति सुललितं दिव्यं स्थानमालोक्य भक्त्या
हृदि च परमदेवीं सम्विभाव्यैक चित्तः।
मधुर-कुसुमगन्धे व्याप्तमाहत्य[१५] साधु
तदुपरि खलु तिष्ठेत् साधनार्थं कुलज्ञः ॥२६॥
जयवति यतमानः शब्द पुष्पं क्षिपेत्तत्
स खलु करकबीजान्यत्र दुर्गे ततो हि।
चिरभव-बकपुष्पं वर्जयित्वार्चयित्वा
यदि जपति विधिज्ञस्तत्क्षणात् सोप्यहञ्च ॥२७॥
उपवनपरियुक्ते शुद्धरम्यालये यो
विधिधृत बरलिंगं[१६] लेपयित्वा सुगन्धैः।

१ . स हि। ११. देवेभि। १२. सनातन्यः। १३. कौलेश/देवेः
१४. कामकलाकान्ते। १५. ... माकृष्ट-साधु। १६. ... कृतबर ... ।

विविधकुसुम धूपै धूपयित्वा लतां[१७] सः
प्रतिजपति सुभक्त्या त्वत् सुतो जायते सः ॥२८॥
अचल शिखर रम्ये शीघ्रमालम्बयित्वा
कनककुसुमसार्धं मधु[१८] पुष्पं निवेद्य।
कृतबहुविधपूजः[१९] श्रीगुरुं[२०] भावयित्वा,
जपति यदि विलासी विष्णुरेव स्वयं सः ॥२९॥
परिचरति स साधुः सिद्धिवर्गः सशङ्कः
परमतम[२१]-लतानां वक्त्रपद्मोपभोगी।
जयति भुवनमध्ये निर्ज्जरश्चामरोऽपि
व्रजति तमनु नित्यं सार्वभौमो नृणां सः ॥३०॥
अभिनव शुभनीरं रक्तपद्मप्रकीर्णम्
विविध-कमलरम्यं भर्ज्जमीन[२२]प्रयुक्तम्।
अपर विहितवस्तु व्याप्तमीशेश्वरोऽपि[२३]
विगतजनसमूहे व्याप्ते[२४] देवि प्राकारे[२५] ॥३१॥
धन धनित-सुशोभे विद्युद्दीप्त[२६]रम्ये
हृदि च परमदेवीं चिन्तयित्वा सभक्तया।
विधिविहित विधानैः स्नानपूजां समाप्य
प्रतिजपतिनिशायां गह्वरे ब्रह्मकः[२७] स्यात् ॥३२॥
इह च गुरुवराज्ञां प्राप्य शीर्षे निधाय
प्रतिजपति[२८] कुलज्ञो भावभेदात् कुलेशि।
सुर गुरुरिह को वा कोऽपि चन्द्रो दिनेशो
व्रजति भुवनमध्ये दिक्पतित्वञ्च कोऽपि ॥३३॥
इति च परमदेव्याः साधनं यन्मयोक्तम्
यदि पठति सुभव्यो गन्धाद्यै र्वा नमेच्च[२९]।
अभिमतफलसिद्धिः सर्वलोकैर्वरेण्यो[३०]
भवति भुवनमध्ये पुत्रदारैर्युतोऽपि ॥३४॥

१७. नतां। १८. शब्द । १९. कृतबलिञ्चपूज्य। २०. स्व गुरुं। २१. परबधू ।
२२. भव्यमीन । २३. व्याप्तमीनेश्वरोऽपि। २४. प्राप्य। २५. प्रकोणे।
२६. दीप्ति ... । २७. ब्रह्मरूपः। २८. त्वपि भजति। २९. गद्गदो
॥सनाभिः। ३०. ... लोकेषु गण्यः।

क. कु. लाइब्रेरी 219049

अचलधनसमहस्तस्य भोगे वसेसु
प्रतिदिनमभिपूजा[३१] देवताया गृहे च।
परिजनगणभक्तिः[३२] सर्वदा तत्र तिष्ठेत्
सदास[३३] वसति राज्ञः सादरः सोऽपि वन्द्यः ॥३५॥

इति कामाख्या तन्त्रे पार्वतीश्वर संवादे षष्ठः पटलः ॥

सप्तमः पटलः

श्रीदेव्युवाच—(श्रीदेवी उवाच)

श्रुतं रहस्यं देवेश कामाख्याया महेश्वर।
महाशत्रुविनाशाय साधनं किं वद प्रभो ॥ १ ॥

श्रीशिव उवाच—

अतिगुह्यतमं[१] देवि तव स्नेहाद्वितन्यते।
महावीरः[२] साधकेन्द्रः प्रयोगन्तु समाचरेत् ॥ २ ॥
पूजयित्वा महादेवीं पञ्चतत्त्वेन साधकः।
महानन्दमयो भूत्वा साधयेत् साधन महत् ॥ ३ ॥
स्वमूत्रं तु समादाय कूर्च्चबीजेन शोधयेत्।
तर्पयेद् भैरवीं घोरां शत्रुनाम्ना[३] पिवेत् स्वयम् ॥ ४ ॥
दशदिक्षु महापीठे प्रक्षिपेदनलेऽपि च।
नग्नो भूत्वा भ्रमेत्तत्र शत्रुनाशो भवेद् ध्रुवम् ॥ ५ ॥
शुक्रशोणितमूत्रेषु वीरो यदि घृणी भवेत्।
भैरवी कुपिता तस्य सत्यं सत्यं वदाम्यहम्[४] ॥ ६ ॥
दृष्ट्वा श्रुत्वा महेशानि निन्दां करोति यो नरः।
स महा"नरकं याति यावच्चन्द्रद्विवाकरौ ॥ ७ ॥
वीराचारं महेशानि न निन्देन्मनसापि च।
वीरो यः स महादेवः स्वेच्छाचारी सदा शुचिः ॥ ८ ॥
मृत्पात्रन्तु समादाय साध्यनाम लिखेत् शिवे।
वायुना पूरितं[५] कृत्वा स्वमूत्रं तत्र निक्षिपेत् ॥ ९ ॥

३१. "' मपि। ३२. गण शक्तिः। ३३. सिरशि।

१. "' गुह्यतरं। २. महाधीरः। ३. सकलं वा। ४. न संशयः
५. सहसा नरकं। ६. वामनासापुच्छिं।

मायावीजं महेशानि अष्टोत्तरशतं जपेत्।
भैरव्यै तर्पयेद्देवि[७] मारणोच्चारनं भवेत् ॥१०॥

स्वमूत्रञ्च समादाय वामहस्तेन शङ्करि।
शोधितं[८] भैरवीमन्त्रै[९] निःक्षिपेत् साधकोत्तमः ॥११॥

उन्मादो जायते शत्रुम्रियते[१०] वा महेश्वरि।
मोहितः क्षोभितश्चापि वश्यो वापि भवेत् ध्रुवम् ॥१२॥

मूत्रसाधनमात्रेण सहस्राक्षसमं रिपुम्।
नाशयेत् साधको वीरो नात्र कार्या विचारणा ॥१३॥

श्रीदेव्युवाच—

शुक्रशोणितमूत्राणि शुद्धानीह कथं प्रभो।
तद्वदस्व महेशान सन्देहनाशनं मम[११] ॥१४॥

श्रीशिव उवाच—

शृणु देवि रहस्यञ्च महाज्ञानं वदाम्यहम्।
शुक्रोऽहं शोणितस्त्वं हि[१२] द्वयोरेवाखिलं जगत् ॥१५॥

शुद्धं सर्वशरीरं तु शुक्रशोणितजं यतः[१३]।
एवं भूतशरीरे तु यद् यद्वस्तु प्रजायते ॥१६॥

अशुद्धं तत् कथं देवि पामरो निन्दति ध्रुवम्।
ब्रह्मज्ञानमिदं देवि मया ते गदितं किं न[१४] ॥१७॥

अतः शुद्धं जगत् सर्वं स्वकायस्थेका कथा[१५]।
ब्रह्मज्ञानं विना देवि न च मोक्षः प्रजायते ॥१८॥

ब्रह्मज्ञानी शिवः साक्षात् विष्णुर्ब्रह्मा च पार्वति।
स एव[१६] दीक्षितः शुद्धो ब्राह्मणो वेदपारगः ॥१९॥

क्रोडे तस्य वसन्तीह सर्वे तीर्थानि निश्चितम् ॥२०॥

इति कामाख्यातन्त्रे पार्वतीश्वर-संवादे सप्तमः पटलः ॥

७. दर्शयेद् "'। ८. शोधित्वा। ९. भैरवी गात्रे। १०. शत्रोर्म्रियते। ११. 'तद्वदस्व' इत्यारभ्य 'मम' इत्यन्त पाठोऽधिकः। १२. भैरवी त्वं च। १३. ततः।
१४. किल। १५. "'कायस्येषु सर्वदा। १६. शरीरः।

अष्टमः पटलः

श्रीदेव्युवाच—

महादेव जगद्वन्द्य[1] करुणा सागर प्रभो।
पूर्णाभिषेकं कौलानां वदमे सुखमोक्षदम् ॥ १ ॥

श्रीशिव उवाच—

शृणु देवि मम प्राणवल्लभे परमाद्भुतम्।
पूर्णाभिषेकं सर्वाशापूरकं शिवत्वप्रदम् ॥ २ ॥
आगत्य सद्गुरुं सिद्धं तन्त्रमन्त्र-विशारदम्[2]।
कौलं सर्वजनश्रेष्ठमभिषेकविधिञ्चरेत् ॥३॥
अतिगुप्तालये शुद्धे रम्ये कौलिकसंपाते।
वेश्याङ्गनाः समानीय तत्त्वानि च सुयत्नतः ॥ ४ ॥
विशिष्टान् कौलिकान्[3] भक्त्या तत्रैव सन्निवेशयेत्।
अर्चयेदभिषेकार्थं[4] गुरुं[5] वस्त्रादिभूषणैः ॥ ५ ॥
प्रणमेद् विविधैर्भक्त्या स्तोषयेत् स्तुति वाक्यतः।
प्रार्थयेत् शुद्धभावेन कुलधर्मं वदेति च ॥ ६ ॥
कृतार्थं कुरु मे नाथ श्री गुरो करूणानिधे।
अधिषिञ्च[6] साधकञ्च[7] सेवार्थं[8] शरणागतम्[9] ॥ ७ ॥
ततोऽभिषिच्य तत्त्वानि शोधयेत् शक्तिमान्मुदा।
स्थापयित्वा पुरः कुम्भं मन्त्रैर्मुद्रादिभिः[10] प्रिये ॥ ८ ॥
वितानैर्धूपदीपैश्च[11] कृत्वा चामोदितं स्थलम्।
नानागन्धैस्तथा पुष्पैः सर्वोपकरणैर्यजेत् ॥ ९ ॥
समाप्य महतीं पूजां तत्त्वानि[12] संनिवेद्य च।
आदौ स्त्रीभ्यः समर्थाय प्रसादं प्र[13]भजेत्ततः ॥१०॥
शुभ-चक्रं विनिर्माय आगमोक्तविधानतः।
अभिषेक्ता साधकांश्च पाययेत्तु स्वयं पिबेत् ॥११॥

१. देवदेव। २. ····सद्गुरुः सिद्धो मन्त्रतन्त्रविशारदः। कौलः सर्वजनख्यातः
३. विशिष्य। विशिष्टकौलिकान्। ४. अभिषेक्तारं। ५. गुरुवद् भावितात्मना।
६. अभिषिक्तैः। ७. साधकैः। ८. देवाहं। ९. ····गतः।
१०. मन्त्रमुद्रादिभिः यन्त्र । ११. धूपदीपानां। १२. आत्मानं।
१३. प्रसादालयं।

भुञ्जीत मत्स्यमांसाद्यैश्चर्व्यचोष्यादिभिश्च तैः।
रमेच्च[14] परमानन्दैर्वेश्यायाञ्च यथा सुखम् ॥१२॥
वदेयुः कर्मकर्तुश्च सिद्धिर्भवतु निश्चला।
अभिषेचनकर्मास्तु[15] निर्विघ्नञ्चेति निश्चितम् ॥१३॥
चक्रालयान्निःसरेन्न जन एकोऽपि शंकरि।
प्रातः कृत्यादिकर्माणि कुर्यात्तत्रैव साधकः ॥१४॥
दिनानि त्रीणि संख्यांप्य भक्त्या तांस्तु समर्चयेत्।
शिष्यश्चादौ दिवारात्रमभिषिक्तो भवेत्ततः ॥१५॥
अनुष्ठानविधिं वक्ष्ये सादरं शृणु पार्वति।
न प्रकाण्डं नहि क्षुद्रं[16] प्रमाणं घटमाहरेत् ॥१६॥
ताम्रेण निर्मितं वापि स्वर्णेन निर्मितञ्च वा।
प्रवालं हीरकं स्वर्णं मुक्तरूप्ये तथैव च[17] ॥१७॥
नानालंकारवस्त्राणि नाना द्रव्याणि भूरिशः[18]।
कस्तूरी कुंकुमादीनि नाना गन्धानि चाहरेत् ॥१८॥
नानापुष्पाणि माल्यानि पञ्चतत्त्वानि यत्नतः।
विहितान् धूपदीपांश्च घृतात्तान् परमेश्वरि ॥१९॥
ततः शिष्यं समानीय गुरुः शुद्धालये प्रिये।
वेश्याभिः साधकैः सार्धं पूजनञ्च समाचरेत् ॥२०॥
परलोक्तविधानेन सावधानेन भक्तितः।
पूजां समाप्य देव्यास्तु स्तवैस्तु प्रणमेन्मुदा ॥२१॥
ततो हि शिवभक्तेभ्यो गन्धमाल्यानि दापयेत्।
आसनं वस्त्रभूषां च प्रत्येकेन कुलेश्वरि ॥२२॥
ततः शंखादिवाद्यैश्च मंगलाचरणैः परैः।
घटस्थापनकं कुर्यात् क्रमं तत्र वदामि ते[19] ॥२३॥
कामबीजेन[20] संप्रोक्ष्य वाग्भवेनैव शोधयेत्।
शक्त्या कलशमारोप्य मायया पूरयेत् जलैः ॥२४॥
प्रवालादीन् पञ्चरत्नान्[21] विन्यसेत् तत्र जलतः।
आवाहयेच्च तीर्थानि मन्त्रेणानेन देशिकः ॥२५॥

१४. रमेरन्। १५. ··· कर्माशु। १६. स्थूलं। १७. प्रवालहीरक-स्वर्ण-मुक्तारूपयभवेन च। १८. भूषितः। १९. शृणु प्रिये। २०. कामराजेन।
२१. प्रवालादिपञ्चरत्नं।

ॐ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च।
सर्वे समुद्राः सरितः सरांसि जलदा नदाः ॥२६॥
ह्रदाः प्रस्रवणाः पुण्याः स्वर्गपातालभूगताः।
सवतीर्थानि पुण्यानि घटे कुर्वन्तु सन्निधिम् ॥२७॥
रमावीजेन जप्तेन[२२] पल्लवैः[२३] प्रतिदापयेत्।
कूर्चेन फलदानं स्यात् गन्धवस्त्रे हृदामुदा[२४] ॥२८॥
ललनयैव सिन्दूरं पुष्पं दधात्तु कामतः।
मूलेन दूर्वां प्रणवैः कुर्यादभ्युक्षणं ततः ॥२९॥
हूँ फट् स्वाहेति मन्त्रेण कुर्याद् दर्भैश्च[२५] ताड़नम्।
विचिन्त्य मूलपीठन्तु तत्र संपूज्य पूरयेत् ॥३०॥
स्वतन्त्रोक्त-विधानेन प्रार्थयेदमुना बुधः[२६]।
तद्घटे हस्तमारोप्य शिष्यं पश्यन् गुरुश्च सः ॥३१॥
उत्तिष्ठ ब्रह्मकलश देवताभीष्टदायक।
सर्वतीर्थाम्बुसम्पूर्णे[२७] पूरयत्वं[२८] मनोरथम् ॥३२॥
अभिषिञ्चेत् गुरुः शिष्यं ततो मन्त्रैश्च पार्वति।
मण्डलैर्निखिलैः सर्वैः[२९] साधकैः शक्तिभिः सह ॥३३।
पल्लवैराम्रकैश्चैव[३०] लतां संवीक्ष्य एव च[३१]।
आनन्दैः परमेशानि भक्तानां हितकारिणी ॥३४॥

अस्याभिषेकमन्त्रस्य—

ॐ दक्षिणामूर्त्तिऋरिनुष्टुप् छन्दः शक्तिर्देवता।
सर्वसंकल्पसिद्धये विनियोगः ॥३५॥
ॐ राजराजेश्वरी शक्तिरर्भैवी रुद्र[३२] भैरवी।
श्मशानभैरवी देवी त्रिपुरानन्द-भैरवी ॥३६॥
त्रिकुरा[३३] त्रिपुटा देवी तथा त्रिपुरसुन्दरी।
त्रिपुरेशी महादेवी तथा त्रिपुरमालिका ॥३७॥
त्रिपुरानन्दिनी देवी तथैव त्रिपुरातनी।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥३८॥

२२. जप्तेन। २३. पल्लवं। २४. वधूबीजे स्थिराकृतिः। हृदात्मना। २५. कुम्भेन।
२६. बुधैः। २७. सर्वतीर्थाम्बुपूर्णेन। २८. पूरयास्मन्। २९. ··· खिलैर्द्रव्यैः।
३०. ····राम्रकादयैश्च। ३१. नतिमच्छिष्यमेव च। ३२. कालः।
३३. त्रिजटा।

ॐ छिन्नमस्ता महाविद्या[३४] तथैवैकजटेश्वरी।
परा तारा जयदुर्गा[३५] शूलिनी भुवनेश्वरी ॥३९॥
हरिताख्या[३६] महादेवी तथैव च त्रिखण्डिका।
नित्यानित्य-स्वरूपा[३७] च वज्रप्रस्तारणी तथा।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥४०॥
ॐ अश्वारूढ़ा महादेवी[३८] तथा महिषमर्दिनी।
दुर्गा च नवदुर्गा च श्रीदुर्गा भगमालिनी ॥४१॥
तथा भगन्दरी देवी भगक्लिन्ना तथा परा।
सर्वचक्रेश्वरी देवी तथा नीलसरस्वती ॥४२॥
सर्वसिद्धिकरी देवी सिद्धगन्धर्वसेविता।
उग्रतारा महादेवी तथा च भद्रकालिका ॥४३॥
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा।
ॐ क्षेमंकरी महामाया चानिरुद्धसरस्वती ॥४४॥
मातङ्गी चान्नपूर्णाच राजराजेश्वरी तथा।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥४५॥
ॐ उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपाति चण्डिका।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥४६॥
ॐ उग्रदंष्ट्रा सुदंष्ट्राच महादंष्ट्रा कपालिनी[३९] ॥४७॥
भीमनेत्रा विशालाक्षी मंगला विजया जया।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥४८॥
ॐ मंगला नन्दिनी भद्रा लक्ष्मीः कान्तियशस्विनी[४०]।
पूष्टिर्मेधा शिवाधात्री[४१] यशा शोभा जया धृतिः ॥४९॥
श्रीनन्दा च सुनन्दा च नन्दिनी नन्दपूजिता।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥५०॥
ॐ विजया मंगला भद्रा धृतिः शान्तिः शिवा क्षमा[४२]।
सिद्धिस्तुष्टिरुमा[४३] पुष्टिः श्रद्धा चैव[४४] रतिस्तथा ॥५१॥

३४ महादेवी। ३५. तारा च जयदुर्गा च। ३६. तडि
३७. नित्या च नित्यरूपा च। ३८. महेशानि। ३९. कर
४०. कीर्तिर्यशस्विनी। ४१. साध्वी। ४२. शि
४३. सिद्धिस्तुष्टीरमा। ४४. श्रीऋद्धिश्च।

दीप्तिः[४५] कान्तिर्यशो लक्ष्मीरीश्वरी बुद्धिरेव च।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥५२॥
ॐ चक्री जयावती ब्राह्मी जयन्ती चापराजिता।
अजिता मानवी श्वेता अदितिश्चादिरेव च ॥५३॥
माया चैव महामाया क्षोहिनी श्लोभिनी तथा।
कमला विमला गौरी शरण्याम्बुधिसुन्दरी ॥५४॥
दुर्गा क्रियाऽरुन्धती घण्टाहस्ता[४६] कपालिनी।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥५५॥
ॐ रौद्री काली च मायूरी[४७] त्रिनेत्राऽचापराजिता।
सुरूपा च कुरूपा[४८] च तथैव विग्रहात्मिका ॥५६॥
चर्चिका चापरा ज्ञेया तथैव सुरपूजिता।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा[४९] ॥५७॥
ॐ वैवस्वती च कौमारी तथा माहेश्वरी परा।
वैष्णवी च महालक्ष्मीः कार्तिकी कौशिकी तथा ॥५८॥
शिवदूती च चामुण्डा मुण्डमालाविभूषिता।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥५९॥
ॐ इन्द्रोऽग्निश्च यमश्चैव निर्ऋतिर्वरूणस्तथा।
पवनो धनदेशानौ ब्रह्माऽनन्तो दिगीश्वराः।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥६०॥
ॐ सम्वत्सराश्चायनश्च मासापक्षौ दिनानि च।
तिथयश्चाऽभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥६१॥
ॐ रविः सोमः कुजः सौम्यो गुरुः शुक्रः शनैश्चरः।
राहुः केतुश्च सततमभिषिञ्चन्तु ते ग्रहाः ॥६२॥
ॐ नक्षत्रं करणं योगोऽमृतं सिद्धिस्ततः परम्।
दग्धं पापं तथा भद्रा योगा वाराः क्षणास्तथा ॥६३॥
वारवेला कालवेला दण्डा राश्यादयस्तथा[५०]।
अभिषिञ्चन्तु सततं मन्त्रपूतेन वारिणा ॥६४॥
ॐ असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त संज्ञकः।
कपाली भीषणाख्यश्च संहारश्चाष्टभैरवाः[५१] ॥६५॥

४५. दीप्ता। ४६. घन्टाकर्णा। ४७. कौमारी। ४८. बहुरूपा च।
४९. एषा पंक्तिर्नास्ति बहुषु। ५०. वृद्धादयस्तथा। ५१. संहारोऽष्टौ।

अभिषिञ्चन्तु सततं मन्त्रपूतेन वारिणा।
ॐ डाकिनी पुत्रकाश्चैव राकिनी पुत्रकास्तथा।
लाकिनी पुत्राश्चान्ये काकिनी पुत्रकापरे ॥६६॥
शाकिनीपुत्रका भूयो हाकिनीपुत्रकास्तथा।
ततश्च दक्षिणीपुत्राः[५२] देवीपुत्रास्ततः परम् ॥६७॥
मातृणाञ्च तथा पुत्राः ऊर्द्धमुख्याः सुताश्च ते।
अधोमुख्याः सुताश्चैव कालमुख्या सुताः परे[५३]।
अभिषिञ्चन्तु ते सर्वे मन्त्रपूतेन वारिणा ॥६८॥
ॐ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
एतेत्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥६९॥
ॐ पुरुषः प्रकृतिश्चैव विकाराश्चैव षोड़शः।
आत्माऽन्तरात्मा परमज्ञानात्मनः प्रकीर्तिताः ॥७०॥
आत्मनश्च गुणाश्चैव स्थूलाः सूक्ष्माश्च ये परे।
एतेत्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥७१॥
ॐ वेदादिबीजं श्रीबीजं तथा तन्नील केतनम्[५४]।
शक्तिबीजं रमाबीजं मायाबीजं गुणाष्टकम्[५५] ॥७२॥
चिन्तामणिर्महाबीजं नारसिंहञ्च शांकरम्।
मार्तण्डभैरवं दौर्गं बीजं श्रीपुरुषोत्तमम् ॥७३॥
गाणपत्यञ्च वाराहं कालीबीजं भयापहम्।
एतानि चाभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥७४॥
ॐ गंगा गोदावरी रेवा यमुना च सरस्वती।
आत्रेयी भारतीचैव सरयूर्गण्डकी तथा ॥७५॥
करतोया चन्द्रभागा श्वेतगंगा च कौशिकी।
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥७६॥
ॐ भैरवो भीमरूपश्च शोनो घर्घर एव च।
सिन्धुश्चैव ह्रदश्चैव तथा पाताल संभवाः ॥७७॥
एते त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥७८॥
ॐ यानि कानि च तीर्थानि पुण्यान्यायतनानि च।
तानि त्वामभिषिञ्चन्तु मन्त्रतन्त्रौषधानि च[५६] ॥७९॥

५२. याविनी। ५३. उन्मुखयाश्च मुताश्च ये। ५४. स्त्रीबीजं मीनकेतनम्।
५५. सुधाकरम्। ५६. मन्त्रपूतेन वारिणा।

ॐ जम्बुद्वीपादयो द्वीपाः सागरा लवणादयः ।
अनन्ताद्यास्तथा नागाः सर्पाद्याः तक्षकादयः ॥८०॥
एते त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥८१॥
ॐ रतिश्च[५७] वल्लभावह्निर्वधट् कूर्चमतः परम् ।
वौषट् कारन्तु फट्कारमभिषिञ्चन्तु सर्वदा ॥८२॥
जम्बुद्वीपादयो द्वीपाः सागरा लवणादयः ।
अनन्ताद्यास्तथा नागाः सर्पा ये तक्षकादयः ॥
एते त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ।
नश्यन्तु प्रेतकुष्माण्डा दानवा राक्षसाश्च ये ।
पिशाचा गुह्यका भूता अभिषेकेण ताड़िताः ॥८३॥
अलक्ष्मीः कालरात्रीश्च[५८] पापानि च महान्ति च ।
नश्यन्तु चाभिषेकेण ताराबीजेन ताड़िताः ॥८४॥
रोगाः शोकाश्च दारिद्र्यं दौर्बल्यं चित्तविक्रिया ।
नश्यन्तु चाभिषेकेण वाग्बीजेनैव[५९] ताड़िताः ॥८५॥
लोकानुरागत्यागश्च दौर्भाग्यमपि दुर्यशः ।
नश्यन्तु चाभिषेकेण मन्मथेन च ताड़िताः ॥८६॥
तेजोनाशः[६०] बुद्धिनाशः[६१] शक्तिनाशस्तथैव[६२]च ।
नश्यन्तु चाभिषेकेण कालीबीजेन[६३] ताड़िताः ॥८७॥
विषाऽपमृत्युरोगाश्च डाकिन्यादिभयं तथा ।
घोराऽभिचारक्रूराश्च ग्रहा नागास्तथा परे ॥८८॥
नश्यन्तु विपदः सर्वाः सम्पदः सन्तु सुस्थिराः ।
अभिषेचनमात्रेण[६४] पूर्णाः सन्तु मनोरथाः ॥८९॥
ततो गुरुः प्राप्तमन्त्रं दीक्षयेत् पुनरेव हि ।
तदा सिद्धिर्भवेत् सत्यं नान्यथा वचनं मम ॥९०॥
ततः शिष्यो गुरुं देवीं[६५] प्रणमेद् बहुधा मुदा ।
दक्षिणां गुरवे दद्यात् कनकाञ्जलिमानतः[६६] ॥९१॥
नाना वस्त्रैरलङ्कारैर्गन्धमाल्यादिभिस्तथा ।
तोषयेत् स्तुतिवाक्यैश्च प्रणमेद् पुनरेव हि ॥९२॥

५७. मतिश्च । ५८. कालरात्रीश्च··· कर्णी च । ५९. कालबीजेनैव ।
६०. तेजोह्रासः । ६१. बुद्धिह्रासः । ६२. शक्तिह्रासः ।६३. शक्ति···· ।
६४. अभिषेकेण शाक्तेन । ६५. ततो देवीं गुरुं चैव । ६६. स्वर्णकाञ्चनमानतः ।

कायेन मनसा वाचा गुरुः कुर्यात् तथाशिषः ।
वचनैर्विविधैः[६७] शिष्यं ग्राह्येत् तत्वमुत्तमम् ॥९३॥
गुरुश्च भैरवैः सार्धं शक्तिभिर्विहरेन्मुदा ।
भैरवः शक्तयश्चापि कुर्युराशीः सुयत्नतः ॥९४॥
तथा त्रिदिवसं व्याप्य भोजयेत् भैरवान् बुधः ।
अष्टमे दिवसे शिष्यं[६८] पुनः कुर्यात्तु सेचनम् ॥९५॥
ताम्रपात्रोदकैर्देवि विद्या राज्ञां[६९] जपन् सुधीः ।
कुम्भकांश्च तथा सप्त संपूर्त्तिः सिद्धिहेतवे ॥९६॥
शक्तिभ्यो भैरवेभ्योऽपि ततो वस्त्रादिभूषणम् ।
दद्यात् प्रयत्नतः साधुर्विद्धि देवि समापनम् ॥९७॥

श्री देव्युवाच—

श्रुतं रहस्यं देवेश चाभिषेचनकर्मणः[७०] ।
गुरुः को वाधिकारी[७१] स्यादत्र तन्मे वद प्रभो ॥ ९८ ॥

श्री शिवउवाच— (Kaulikeswara)

महाज्ञानो स कौलेन्द्रः[७२] शुद्धो गुरुपरायणः ।
निग्रहानुग्रहे शक्तः शिष्यपालनतत्परः ॥ ९९ ॥
पुत्रदारादिभिर्युक्तः स्वजनैश्च[७३] प्रपूजितः ।
श्रद्धावानागमे नित्यं[७४] सोऽधिकर्त्ता च नान्यकः[७५] ॥१००॥
अन्धं खञ्जं तथा रुग्नं स्वल्पज्ञानयुतं पुनः ।
सामान्यकौलं वरदे वर्जयेन्मतिमान् सदा ॥१०१॥
उदासीनं विशेषेण वर्जयेत् सिद्धिकामुकः[७६] ।
उदासीनमुखाद्दीक्षा वन्ध्या नारी यथा तथा[७७]॥१०२॥
अज्ञानाद् यदि वा मोहात् उदासीनात्तु[७८] पामरः ।
अभिषिक्तो भवेद्देवि विघ्नस्तस्य पदे पदे ॥१०३॥
किं तस्य जपपूजाभिः किं ध्यानैः किञ्च भक्तितः ।
सर्वं हि विफलं तस्य नरकं याति चान्तिमे ॥१०४॥

६७. वात्सल्यैर्विविधैः । ६८. शिष्यः । ६९. विद्यारत्नं ।
७०. कर्मणि । ७१. कौलाधिकारी । ७२. कौलिकेन्द्रः । ७३. सज्जनश्च ।
७४. श्रुद्धबालागमे नित्यं । ७५. न चान्यथा । ७६. कारकः । ७७. रतिर्यथा/यथा प्रिये
७८ उदासीनं तु ।

कल्पकोटिशतं देवि भुंक्ते स नरकं सदा ।
ततो हि बहुजन्मेभ्यो देवीमन्त्रमवाप्नुयात् ॥१०५॥
ततो[७९] हितं महाशुद्धं[८०] गृहस्थं गुरुमालभेत् ।
अभिषेचनकर्माणि पुनः कुर्यात् प्रयत्नतः ॥१०६॥
सफलं हि सदा[८१] कर्म सर्वं तस्य भवेद् ध्रुवम् ।
विद्यापि जननीतुल्या पालितं सततं प्रिये ॥१०७॥
यथा पशुं परित्यज्य कौलिकं गुरुमालभेत् ।
उदासीनं परित्यज्यतथाभिषेचनं मतम्[८२] ॥१०८॥
अभिषिक्तः शिवः साक्षादभिषिक्तो हि दीक्षितः ।
सएव ब्राह्मणो धन्यो देवि देवपरायणः ॥१०९॥
तस्यैव सफलं जन्म धरण्यां शृणु पार्वति ।
तस्यैव सफलं कर्म तस्यैव सफलं धनम् ॥११०॥
तस्यैव सफलो धर्मः कामश्च फलदो[८३] मतः[८४] ॥१११॥
दीक्षा हि सफला देवि क्रिया च सफला तनुः ।
सर्वं हि सफलं तस्य गिरिजे बहु किं वच ।
यत्र देशे वसेत् साधुः सोऽपि वाराणसीसमः[८५] ॥११२॥
तस्य क्रोड़े वसन्तीह सर्वतीर्थानि निश्चितम् ।
सत्यं सत्यं महामाये गुरुतत्वं[८६] मयोदितम् ॥११३॥
उक्तानि यानि यानीह सेचनानि च पार्वति ।
सर्वतन्त्रेषु तान्यस्य[८७] कलां नार्हन्ति षोड़शीम् ॥११४॥
योग्यं गुरुं तथा शिष्यं विनैतद्घटनं[८८] नहि ।
जायते देवदेवेशि सत्यं सत्यं मयोदितम् ॥११५॥
इदन्तु सेचनं देवि त्रिषु लोकेषु दुर्लभम् ।
गणेशः पात्रमत्रैव कार्त्तिकेयोऽपि पार्वति ॥११६॥
मम तुल्यो विष्णु तुल्यो ब्रह्मतुल्योऽत्र भाजनम् ।
पञ्चवक्त्रश्च शक्तो न वर्णितुं परमेश्वरि ॥११७॥
इति ते कथितं गुह्यं[८९] सेचनं परमं महत् ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥११८॥

७९. अतो । ८०. हि विहितं शुद्धं । ८१. तदा ८२. शतम्
८३. सफलः । ८४. मनुः । ८५. मतः । ८६. पुनः सत्यं । ८७. सर्वतन्त्रज्ञता तस्य कलां नार्हति । ८८. ....पटलं । ८९. गुप्तं ।

यथा रतिर्गोपनीया यथा हि स्तनमण्डलम्[९०] ।
यथा योनिर्गोपनीया तथाभिषेचनं परम्[९१] ॥११९॥
निखाते धनमारोप्य गोपयेत्तु यथा नरः ।
तथैवतु महामाये गोपनीयं ममाज्ञया ॥१२०॥
इति कामाख्या तन्त्रे देवीश्वर-संवादे अष्टमः पटलः ।

नवमः पटलः

श्री पार्वत्युवाच—

मुक्तितत्त्वं महादेव वद मे करुणानिधे ।
यस्मिन् षड् दर्शनानीह चोपहास्यगतानिच ॥ १ ॥

श्री शिव उवाच

शृणुदेवि शुभे विज्ञे यत् पृष्टं तत्वमुत्तमम् ।
एतन्मर्म[१] च त्वं वेत्सि अहं वेद्मि[२] तथा हरिः ॥ २ ॥
मोदकेन यथा लोकः प्रतारयति[३] बालकान् ।
निगड़ेन यथा देवि बध्नाति दुर्जनं नृपः ॥ ३ ॥
तथा मुग्धीकृतालोके[४] दर्शनैश्चाथवा[५] मया ।
दुर्जने यदि मुक्तिः स्यात् शंकयेति[६] शुभानने ॥ ४ ॥
षड्दर्शन महाकूपे पतिताः[७] पशवः प्रिये ।
परमार्थं नजानन्ति तत सर्वं काक भाषितम्[८] ॥ ५ ॥
न सारः कदलीवृक्षे ऐरण्डे तु[९] यथानघे[१०] ॥ ६ ॥
दर्शनेषु तथा मुक्तिर्नास्ति नास्ति कलौ युगे[११] ।
यथा मरीचिकायाश्च निवर्तन्ते पुनर्मृगाः ॥ ७ ॥
दर्शनेभ्यो निवर्तन्ते तथा मुमुक्षवः पुनः ।
श्रीगुरोश्च प्रसादेन मुक्तिमादौ समालभेत्[१२] ॥ ८ ॥

९०. तथाभिषेचनं परम् । ९१. यथायोनिः इत्यारभ्य परम् इत्यन्तः पाठो नदृश्यते क्वचित् ।

१. एतद्धर्मार्चनं वेत्सि । २. वेत्सि त्वमहं वेद्मि । ३. प्रभावयति ।
४ तथानंगीकृतो । ५. दर्शनैर्वंचरो माया तथा मुग्धाकृता लोकाः । ६. शंकीयति ।
७. शंकया । ८. दर्वी पाकरसं यथा । ९. एरण्डेतु । १०. शुभानने ।
११. मयोदितम् । १२. सदालभेत् ।

विचरेत् सर्वशास्त्रेषु कौतुकाय ततः सुधीः ।
मुक्तितत्वं प्रवक्ष्यामि सारञ्च[13] शृणु पार्वति ॥ ९ ॥
शरीरं धारणं यत्तु[14] कुवन्तीह पुनः पुनः ।
आदावनुग्रहो देव्याः श्री गुरोस्तदनन्तरम् ॥ १० ॥
तथा नाना शुभा दीक्षा[15] भक्तिस्तस्य प्रजायते ।
ततो हि साधनं शुद्धं तस्माज् ज्ञानं सुनिर्मलम् ॥११॥
ज्ञानान्मोक्षो भवेत् सत्यमिति शास्त्रस्य निर्णयः ।
मुक्तिश्चतुर्विधा प्रोक्ता सालोक्यन्तु शुभानने ॥१२॥
सारूप्यं सहयोज्यञ्च निर्वाणञ्च[16] परात् परम् ।
सालोक्यं वसति लोके सारूप्यन्तु स्वरूपना[17] ॥
सायोज्यं कलया युक्तं निर्वाणञ्च मनोलयः ॥१३॥

श्रीदेव्युवाच—

सम्यग् लयो जनस्यैव निर्वाणं यतत् तु कथ्यते ।
तत् किम् वद महादेव संशयं लयसात्[18] कुरु ॥१४॥

श्रीशिव उवाच—

व्यक्तिर्लयात्मिका मुक्तिरसुराणां दयानिधे ।
दुर्ज्जनत्वाल्लोपयित्वा क्रीड़यामि सुरानहम् ॥१५॥
मनोलयात्मिका मुक्तिरिति जानीहि शंकरि ।
प्राप्ता मया विष्णुना च ब्रह्मणा नारदादिभिः ॥१६॥
सालोक्यं केवलं तत्तु सारूप्यं युगलद्वयम्[19] ।
त्रिधा सायोज्यवानेति निर्वाणो सर्वमेव[20] हि ॥१७॥
नीलोत्पलदलश्यामा मुक्तिर्द्विदलवर्तिनी ।
मुक्तस्यैव सदा स्फीता स्फुरत्यविरतं प्रिये[21] ॥१८॥
सनातनी जगन्माता[22] सच्चिदानन्दरूपिना[23] ।
परा च जननी सैव सर्वाभीष्ट प्रदायिनी ॥१९॥
इष्टे निश्चलसम्बन्धः स च निर्वाणमीरितः ।
मुक्तिज्ञानं कुलज्ञानं नान्यज्ञानं महेश्वरि ॥२०॥
साधनां देवदेवेशि सर्वेषां विद्धि निश्चितम् ।
स्वर्गे मर्त्ये च पाताले ये ये मुक्ता भवन्ति हि ॥२१॥

१३. सादरं । १४. यस्य । १५. तदाननात् ततो दीक्षा । १६. निर्वाणं हि ।
१७. स्वरूपभाक् । १८. लयतां । १९. सालोकी केवलं यत् तु याति सारूप्ययुग् द्वयम् ।
२०. सर्वत्र एव । २१. तत् तु । २२. जगत्वन्द्या । २३. दायिनी ।

बभूवुश्च भविष्यन्ति[24] सर्वेषां मुक्तिरिदृशी ।
तथा हि साधनं ज्ञानं[25] पञ्चतत्त्वैश्च मुक्तिदम् ॥
अनुग्रहश्च देव्याश्च कुलमार्गप्रदर्शकः ।
दीक्षा कुलात्मिका देवि श्रीगुरोर्मुखपंकजात् ॥
कुलद्रव्येषु या भक्तिः सा मोक्षदायिनी मता ।
ज्ञात्वा चैवं प्रयत्नेन कुलज्ञानी भवेद् बुधः ॥
यदि भाग्यवशाद्देवि मन्त्रमेतत्तु लभ्यते ।
मुक्तेश्च कारणं तस्याः[26] स्वयं ज्ञातं न चान्यथा ॥
अश्रुतं मुक्ति तत्त्वं हि कथितं ते महेश्वरि ।
आत्मयोनिर्यथा देवि तथा गोप्यं ममाज्ञया ॥
इति कामाख्यातन्त्रे देवीश्वरसंवादे नवमः पट

दशमः पटलः

श्रीदेव्युवाच—

कामाख्या या महादेवी कथिता सर्वरूपिणी ।
सा का वद जगन्नाथ कपटं मा कुरु प्रभो ॥
कुर्यास्तु कपटं नाथ यदि मे शपथस्त्वयि ।
रतौ का कामिनी योनिं सम्यग् न दर्शयेत् पतिम् ॥
श्रुत्वैतत् गिरिजा वाक्यं प्रहस्योवाच शंकरः ।

श्रीशंकर उवाच—

शृणुदेवि मम प्राणवल्लभे कथयामि ते ॥
या देवी कालिका माता सर्वविद्या स्वरूपिणी ।
कामाख्या सैव विख्याता सत्यं देवि[1] न चान्यथा ॥
सैव[2] ब्रह्मेति जानीहि संज्ञार्थं[3] दर्शनानि च ॥
विचरन्ति चोत्सुकानि[4] यथा चन्द्रे हि वामनः[5] ।
अस्या[6] हि जायते सर्वं जगदेतच्चराचरम् ॥

२४. बहवश्च भविष्यन्ति । २५. ज्ञेयं । २६. तस्य ।

१. सत्यं । २. शिवं । ३. यज्ञार्थं । ४. ....
५. चन्द्रे चकोरका । । ६. तस्यां ।

लीयते पुनरस्याञ्च सन्देहं मा कुरू प्रिये।
स्थुला सूक्ष्मा परा देवी सच्चिदानन्दरूपिणी ॥ ७ ॥
अमेयविक्रमाख्यासा[७] करुणासागरा मता।
मुक्तिमयी जगद्धात्री सदानन्दमयी तथा[८] ॥ ८ ॥
विश्वम्भरी क्रियाशक्ति स्ताता[९] सैव सनातनी।
यथा कर्म समाप्तौ च दक्षिणा फल सिद्धिदा ॥ ९ ॥
तथा मुक्तिर्सौ देवि सर्वेषां फलदायिनी।
अतो हि दक्षिणाकाली कथ्यते वरवर्णिनि ॥१०॥
कृष्णवर्णा सदा काली आगमेषु च[१०] निर्णयः।
उक्तानि सर्व तन्त्राणि तन्त्रेणानेन निश्चितम्[११] ॥११॥
कृत्वा संकल्पमित्यस्य[१२] काम्येषु पाठयेद्बुधः।
पठेत् वा पाठयेद्वापि श्रृणोति श्रावयेदपि[१३] ॥ १२॥
तं तं काममवाप्नोति श्रीमत् काली प्रसादतः।
यथा स्पर्शमणिर्देवि तथैतत्तन्त्रमुत्तमम् ॥ १३ ॥
यथा कल्पतरुर्दाता तथा ज्ञेयं मनीषिभिः।
यथा सर्वाणि रत्नानि सागरे सन्ति निश्चितम् ॥ १४ ॥
तथात्र सिद्धयः सर्वाः भुक्तिर्मुक्तिर्वरानने।
सर्वदेवाश्रयो मेरुर्यथा सिद्धिस्तथा पुनः ॥ १५ ॥
सर्वविद्यायुतं तन्त्रं[१४] शपथेन वदाम्यहम्।
यस्य गेहे वसेत् देवि तन्त्रमेतद् भयापहम् ॥ १६ ॥
रोगशोकपातकानां लेशो नास्ति कदाचन।
तत्र दस्युभयं नास्ति ग्रहराजभयं न च ॥ १७ ॥
न चोत्पातभयं तस्य न च मारी भयं तथा।
न पराजयस्तेषां हि भयं नैव [१५] मयोदितम् ॥ १८॥
भूतप्रेतपिशाचानां दानवानाञ्च रक्षसाम्।
न भयं क्वापि सर्वेषां व्याघ्रादीनां तथैव च ॥ १९ ॥
कूष्माण्डानां भयं नैव यक्षादीनां भयं न च।
विनायकानां सर्वेषां गन्धर्वानां तथा न च ॥ २० ॥

७. अमेयविक्रमभ्यामा। ८. सदा। ९. स्ततः। १०. आगमस्येति।
११. तथा नान्येति निर्णयः। १२. संकल्पसिद्धौ। १३. पठित्वा श्रावयेद् वापि श्रृणोति पूजयेत् यदि।
१४. मंत्रं। १५. देवि।

स्वर्गे मर्त्ये च पाताले ये ये सन्ति भयानकाः।
ये ये[१६] विघ्नकाराश्चैव न तेषां भयमीश्वरि ॥ २१ ॥
यमदूताः पलायन्ते विमुखा भयविह्वलाः।
सत्यं सत्यं महादेवि शपथेन वदाम्यहम् ॥ २२ ॥
सम्पत्तिरचनात्रित्र[१७] तिष्ठति साप्त पौरुषम्।
वाणी तथैव देव्यास्तु प्रसादा त्तत्र ईरिता[१८] ॥ २३ ॥
एतत्तु कथितं स्नेहात् न प्रकाश्यं कदाचन।
गोपनोयं गोपनोयं गोपनीयं सदा प्रिये ॥ २४ ॥
पशोरग्रे विशेषेण गोपयेत्तु प्रयत्नतः।
भ्रष्टानां साधकानाञ्च सान्निध्ये न वदेदपि ॥ २५ ॥
न दद्यात् काणखञ्जेभ्योऽवगीतेभ्ये[१९] स्तथैव च।
उदासीनजनस्यैव सान्निध्ये न वदेदपि ॥ २६ ॥
दाम्भिकाय न दातव्यं नाभक्ताय विशेषतः।
मूर्खाय भावहीनाय दरिद्राय[२०] ममाज्ञया ॥ २७ ॥
दद्यात् शान्ताय शुद्धाय कौलिकाय महेश्वरि।
काली भक्ताय शैवाय वैष्णवाय शिवाज्ञया ॥ २८ ॥
अद्वैत भावयुक्ताय महाकालप्रजापिने।
सुरास्त्रीवन्द्यकायापि शिवाबलिप्रदाय च[२१] ॥ २९।

ॐ कालिकायै नमः

इति श्री कामाख्या तन्त्रे देवीश्वर संवादे दशमः पटलः ॥

समाप्तश्चायं ग्रन्थः

परिभिष्टम् (१)

(कालिकापुराणस्य एकपञ्चाशोऽध्यायतः)

मुनिरुवाच

श्रृणु त्वं कथयाम्यद्य यत्र चाराधितो हरः।
नचिरादेव भवतोरायास्यति समक्षताम् ॥ ५९ ॥

१६. हिंसाः। १७. सम्पत्तिरतुला। १८. प्रसादेन तु ईरिता।
१९. ··· विगीतेभ्यः। २०. दुरिताय। २१. शिवाय विनीतायच।

नित्यं यत्र महादेवो वसन् भवति तुष्टये।
युवां[1] तत् संप्रवक्ष्यामि स्थानं गुह्यं प्रकाशितम् ॥ ६० ॥
वाराणसी नाम पुरी गंगातीरे मनोहरे।
वरणायास्तथा[2] चासेर्मध्ये चापाकृतिः सदा ॥ ६१ ॥
स्वयं वृषध्वजस्तत्र नित्यं वसति योगिनाम्।
सदा प्रीतिकरो योगी स्वयं चाप्यात्मचिन्तकः ॥ ६२ ॥
विद्यत्स्था सा पुरी नित्यं भर्गयोगबलाद् धृता
दिव्यज्ञानं ददात्येषा तत्र यो म्रियते नरः ॥ ६३ ॥
तस्मै स्वयं महादेवः संसार-ग्रन्थिमुक्तये।
स भूत्वा परमो योगी मृतस्तत्र भवान्तरे ॥ ६४ ॥
सुलभेनैव निर्वाणमाप्नोति हरसम्मतः।
योगयुक्तो महादेवः पार्वत्या सहितः[3] सदा ॥ ६५ ॥
देवगन्धर्वयक्षाणां मानुषाणां च नित्यशः।
ज्ञेयो हरः प्रकाशश्च क्षेत्रं तच्च प्रशाशितम् ॥ ६६ ॥
न तत्र कामदो देवो नचिराच्च प्रसीदति।
आराधितश्चिरं प्रीत्या निर्वाणाय प्रसीदति ॥ ६७ ॥
गौर्याविवर्जिता[4] सा तु पुरी तत्र न गच्छति।
योगस्थानं महाक्षेत्रं कदाचिदपि शांकरी ॥ ६८ ॥
आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत्।
कथितं नातिदूरे च वर्तते नरसत्तमौ ॥ ६९ ॥
अपरं तु प्रवक्ष्यामि गुह्यं पीठं सदार्चितम्।
हरगौरीसमायुक्तं परं धर्मार्थकामदम् ॥ ७० ॥
तपसा चाति तीव्रेण स्त्रिराद् भवति मोक्षदम्।
नाचिरात् कामदं पुण्यं क्षेत्रं पीठं निगद्यते ॥ ७१ ॥
चिरेण तु कामदो देवो न चिराद् यत्र ज्ञानदः।
तत् क्षेत्रमिति लोकेषु गदयते पूर्ववन्दिभिः[5] ॥ ७२ ॥
कामरूपं महापीठं गुह्याद्गुह्यतमं परम्।
सदा सन्निहितस्तत्र पार्वत्या सह शंकरः ॥ ७३ ॥

---

१. तसौ। २. वरणाङ्कास्तथैवाग्रे.... ३.... सहितः। ४. गौर्य्यादिवर्जिता
५. ....सूरिभिः।

नचिरात् पूजितो देवस्तस्मिन् पीठे
पार्वती चानुगृह्णाति भर्गभक्तं तु
ददाति नाचिरात् कामं भक्ताय
तत् तु पीठं प्रवक्ष्यामि शृणुत साम्प्र
करतोया नदी-पूर्वं यावद् दिक्क
त्रिंशद् योजनविस्तीर्णं योजनैक
त्रिकोणं कृष्णवर्णञ्च प्रभूता
नदीशतसमायुक्तं कामरूपं
शम्भुर्नेत्राग्निनिर्दग्ध कामः शम्भ
तत्रूपं यतः प्राप कामरूपं त
तस्य पीठस्य वायव्यां नैर्ऋत्यां
ऐशान्यां च तथाग्नेय्यां मध्ये पार्श्वे
स्वमाश्रमपदं कृत्वा षट्सु स्थानेषु
नित्यं वसति तत्रापि पार्वत्या सह

परिशिष्टम् (२)

कामाख्या-माहात्म्यम्

कालिका पुराणे द्विषष्टितमो

भगवानुवाच—

कामार्थमागता यस्मान्मया सार्द्धं मह
कामाख्या प्रोच्यते देवी नीलकूटे र
कामदा कामिनी कामा कान्ता कामांगद
कामांगनाशिनी यस्मात् कामाख्या तेन चो
एतस्याः शृणु माहात्म्यं कामाख्याया वि
या सा प्रकृतिरूपेण जगत्सर्वं नियं
मधुकैटभनाशाय महामायाविमो
यदा संयुयुधे विष्णुस्तदैषामोहयद्ध
दैनन्दिने तु प्रलये प्रसुप्ते गरुड
तस्य श्रवणविड्जातावसुरौ मधु

---

६. ततो मतः। १. सोच्यते, २. मोहयद् दृढम्।

कूर्मपृष्ठे स्थिता देवी[३] विशीर्णेवाभवज्जलैः[४] ।
तां विशीर्णां योगनिद्रा महामाया व्यलोकयत् ॥ ६
तां वै दृढतरां पृथ्वी कर्तुं प्रति तदेश्वरी ।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥ ७ ॥
इदानीमाज्यवत्[५] पृथ्वी प्रवृत्ता कोमला जलैः ।
सृष्टिकाले जनान् सोढुं कथं शक्ता भविष्यति ॥ ८ ॥
इति संचिन्त्य सा माया जगतां सृष्टिरूपिणी ।
उपागम्य तदा विष्णुमाससाद सुनिद्रितम् ॥ ९ ॥
तं तु सुप्तं समासाद्य जगन्नाथं जगत्पतिम् ।
वामहस्तकनिष्ठाग्रं तस्य कर्णे न्यवेशयत् ॥१०॥
निवेश्य नखराग्रेण प्रोद्धृत्य श्रावणं मलम् ।
चूर्णीचकार सा देवी योगनिद्रा जगत्प्रसूः ॥११॥
तत्कर्णमलचूर्णिभ्यो मधुर्नामासुरोऽभवत् ।
ततो दक्षिणहस्तस्य कनिष्ठाग्रं तु दक्षिणे ॥१२॥
कर्णे न्यवेशयद् देवी तस्मादप्युद्धृतं मलम् ।
तच्चापि क्षोदयामास करघाखाद्वयेन तु ॥१३॥
ततोऽभत् कैटभो नाम बलवान् सोऽसुरो महान् ।
उत्पन्नः स च पानार्थं यस्मान्मृगितवान्मधु ॥१४॥
ततस्तस्य महादेवी मधुनामाकरोत्तदा ।
उत्पन्नः कीटवद्भाति महामायाकरे यतः ॥१५॥
ततोऽस्य कैटभं नाम महामाया तदाकरोत् ।
तावुवाच महामाया युध्यतां हरिणा सह ॥१६॥
युवां नो श्रद्धयेवात्र भवन्तौ निहनिष्यति ।
युवां यदा प्रभाषेथे आवां विष्णो वधान भो ॥१७॥
तदैवायं युवां हन्ता नान्यथा हरिरप्यथ ।
महामायामोहितौ तौ विष्णुगात्रं तदा गतौ ॥१८॥
भ्रममाणौ ददृशतुर्नाभिपद्मोत्थितं विधिम् ।
तमूचतुस्तौ धातारं हनिष्यावोऽद्य त्वामिह ॥१९॥
तं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ।
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम् ॥२०॥

३. पृथ्वी, ४. कूर्मपृष्ठगता पृथ्वी प्रवृत्ता कोमलाजलैः, ५. इदानीं साभवत् ।

प्रसादयामास तदा स्तुतिभिर्बहुभिर्भयात् ।
चिर स्तुताथ सा देवी ब्रह्मणा जगदात्मना ॥२१॥
प्रसन्ना तरसा व्यग्रमुवाच च यथाविधि ।
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव ॥२२॥
तद् वद त्वं महाभाग करिष्याम्यहमद्य ते ।
ततस्तेन महामाया प्रोक्ता धात्रा महात्मना ॥२३॥
प्रबोधय जगन्नाथं यावत्तौ मां हनिष्यतः ।
सम्मोहय दुराधर्षावसुरौ मधुकैटभौ ॥२४॥
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना ।
बोधयामास वैकुण्ठं मोहयामास[६] तौ तदा ॥२५॥
ततः प्रबुद्धः कृष्णस्तु ददर्श भयशालिनम् ।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥२६॥
ततस्ताभ्यां स युयुधे ह्यसुराभ्यां जनार्दनः ।
नाशकद्धारितुं वीरावसुरौ मधुकैटभौ ॥२७॥
अनन्तोऽपि फणाग्रेण तान्नो धर्तुं क्षमोऽभवत् ।
युध्यमानान् महावीरान् वैकुण्ठं मधुकैटभान् ॥२८॥
अथ ब्रह्मा शिलारूपां स्थितिशक्तिं तदाकरोत् ।
अर्धयोजनविस्तीर्णामर्धयोजनमायताम् ॥२९॥
तस्यां शिलायां गोविन्दो युयुधे नृपसत्तम ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥३०॥
तस्यां तु शक्त्यां मग्नायां तोये स युयुधे हरिः ।
पञ्चवर्षसहस्राणि बाहुयुद्धैर्निरन्तरम् ॥३१॥
यदा वै नाशकद् हन्तुं तौ विष्णुर्जगतां पतिः ।
परां चिन्तां तदावाप विधातापि भयात् ततः ॥३२॥
ततस्तावेव तं विष्णुमूचतुर्बलदर्पितौ ।
पुनः पुनर्जगन्मातृ-महामाया-विमोहितौ ॥३३॥
तुष्टौ स्वस्त्वन्नियुद्धेन वरं वरय माधव ।
तवेष्टं सम्प्रदास्यावः सत्यमेतद् ब्रुवोऽधुना ॥३४॥
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः[७] ।
उवाच तौ युवां वध्यौ भवतां मे महाबलौ ॥३५॥

६. योधयामास । ७. भगवान् गरुडध्वजः ।

इति देहि वरं मह्यं दातव्यं यदि विद्यते ।
तौ तदा प्राहतुर्नाशस्त्वत्तो नौ शोभनोऽधुना[८] ॥३६॥
तत्रावां जहि नो यत्र तोयं सम्प्रति विद्यते ।
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः ॥३७॥
ब्रह्माणं मां च शीघ्रेण प्राहेदं चात्मसंज्ञया ।
ब्रह्माशक्तिशिलां शीघ्रमुद्धृत्य ध्रियतां यथा ॥३८॥
तत्र स्थित्वा महाघोरौ हनिष्यामि महाबलौ ।
ततो ब्रह्मा ह्यहं चैव उद्धार शिलां तु ताम् ॥३९॥
तस्यां मध्ये पूर्वभागे ह्यहं पर्वतरूपधृक् ।
ऊर्ध्वे स्थित्वा शिलां भित्त्वा प्रविवेश रसातलम् ॥४०॥
ऐशान्यामभवत् कूर्मः पर्वताग्रहीच्छिलाम् ।
वायव्यां च तथानन्तो नैर्ऋत्यां च सुरेश्वरी ॥४१॥
महामाया जगद्धात्री शैलरूपप्रधारिणी ।
आग्नेय्यां च तथा विष्णुरेकरूपेण संस्थितः ॥४२॥
ब्रह्मशक्तिशिलां गृह्णन् भगवान् परमेश्वरः ।
मध्ये ब्रह्मा त्वहं चैव वराहश्च तथापरः ॥४३॥
ततो वराहपृष्ठास्य चरमे जगतांपतिः ।
स्थित्वा शिलामवष्टभ्य ब्रह्मशक्तिमधोगताम् ॥४४॥
वामोरुजघने यत्नादारोप्य शिरसी तयोः ।
जगदाधारभूतः स सर्वयत्नेन संयुतः ॥४५॥
सर्वैर्बलैः समाक्रम्य चिच्छेद च पृथक् पृथक् ।
मधुकैटभयोः सम्यग् ग्रीवयोः[९] पृथिवीमृते ॥४६॥
तस्य चाक्रमत स्थेम्ना ब्रह्मशक्तिरधोगता ।
ध्रियमाणापि देवौघैर्यत्नादपि मुहुर्मुहुः ॥४७॥
ततस्तयोस्तु मृतयोः शरीरे जगतां पतिः ।
ब्रह्मशक्तिं समुद्धृत्य न्यधात् तस्यां प्रयत्नतः ॥४८॥
उद्धृतायां पृथिव्यां तु तयोर्मेदोविलेपनैः ।
सुदृढामकरोत् पृथ्वीं क्लेदितां तोयराशिभिः ॥४९॥
मेदोविलेपनाद् यस्माद् गीयते मेदिनी च सा ।
अद्यापि पृथिवी देवी देवराक्षसमानुषैः ॥५०॥

८. बौ तदा प्राह युष्मत्तो योग्यो नौ शोभनो वरः । ९. वीरयोः ।

अथ काले बहुतिथे व्यतीते प्राणिसर्जने ।
अगृह्णां दक्षतनयां भार्यार्थेऽहं वधूं वराम् ॥५१॥
सा मेऽभूत् प्रेयसी भार्या प्रादाय समयं पितुः ।
अनिष्टकारी त्वं चेत् स्याः प्राणांस्त्यक्ष्ये तदा त्वहम्॥५२॥
ततो यज्ञे समस्तांस्तु स च वव्रे चराचरम् ।
न मां नापि सतीं वव्रे तदानीष्टान्मृता तु सा ॥५३॥
ततो मोहं[१०] समाक्रान्तस्तमादाय मृतामहम् ।
प्रातः[११] पीठवरं तं तु भ्रममाण इतस्ततः ॥५४॥
तस्यास्त्वङ्गानि पर्यायात् पतितानि यतो यतः ।
तत् तत् पुण्यतमं जातं योगनिद्राप्रभावतः ॥५५॥
तस्मिंस्तु कुब्जिकापीठे सत्यास्तद्योनिमण्डलम् ।
पतितं तत्र सा देवी महामाया व्यलीयत ॥५६॥
लीनायां योगनिद्रायां मयि पर्वतरूपिणि ।
स नीलवर्णः शैलोऽभूत्पतिते योनिमण्डले ॥५७॥
स तु शैलो महातुङ्गः पातालतलमाविशत् ।
तस्या आक्रमणाद्गाढं[१२] ह्यन्तस्थं द्रुहिणो ह्यधात् ॥५८॥
स तु पूर्वं ब्रह्मशक्तिं शिलां धर्तुं चतुर्मुखः ।
शैलरूपोऽभवत् तेन शैलरूपेण मामघात् ॥५९॥
ब्रह्मा पर्वतरूपी स मयि पर्वतरूपिणि ।
स शक्तोऽधोऽगमद् गाढमाक्रान्तो मामया विधेः[१३] ॥६०॥
ततो वराहः संसक्तो मयि मां स तु माधवः ।
शैलरूपः शैलरूपं धर्तुं समुपचक्रमे ॥६१॥
सोऽप्यधोऽयान्मया सार्धं तदा पर्वतरूपिणि ।
आक्रम्य देवीं पृथिवीं स्थितो भुवि निखानितः ॥६२॥
शतं शतं योजनानां तुङ्गमासीद् गिरित्रयम् ।
तदाक्रान्तं महादेव्या सर्वमेव ह्यधोगतम् ॥६३॥
क्रोशमात्रस्थितं तुङ्गशेषं तत्त्रितयस्य तु ।
एका समस्तजगतां प्रकृति सा यतस्ततः ॥६४॥
ब्रह्मविष्णुशिवैर्देवैर्धृता स जगतां प्रसूः ।
तत्र पूर्वो ब्रह्मशैलः श्वेत इत्युच्यते सुरैः ॥६५॥

१०. समुप्पन्नः । ११. प्राप्तः । १२. वांच । १३. विधौ

मद्रूपधारी शैलस्तु नील इत्युच्यते तथा ।
स तु मध्यगतः पीठस्त्रिकोणोलूखलाकृतिः ॥६६॥
विभ्राजमानः सततं मध्ये ब्रह्मवराहयोः ।
वराहः शैलरूपो यः स चित्र इति कथ्यते ॥६७॥
सर्वेषां संस्थितः पश्चाद् दीर्घः सर्वेभ्य एव तु ।
ऐशान्यां योऽभवत् कूर्मः शैलरूपो महाद्युतिः ॥६८॥
मणिकर्णः स नाम्ना तु ख्यातो देवौघसेवितः ।
योऽनन्तरूपः शैलस्तु वायव्यां समवस्थितः ॥६९॥
मणिपर्वतसंज्ञोऽसौ पर्वतो माधवप्रियः ।
महामाया गिरिर्यस्तु नैर्ऋत्यां समवस्थितः ॥७०॥
स गन्धमादनो नाम्ना सर्वदा शङ्करप्रियः ।
वराहपृष्ठचरमे यतश्छिन्नौ महासुरौ ॥७१॥
हरिणा तत्र संयातः पाण्डुनाथ इति स्मृतः ।
ब्रह्मशक्तिशिलायास्तु पूर्वभागे तु मध्यतः ॥७२॥
यस्तु पर्वतरूपोऽहं स तु भस्मचलाह्वयः ।
एवं पुण्यतमे पीठे कुब्जिकापीठसंज्ञके ॥७३॥
नीलकूटे मया सार्धं देवी रहसि संस्थिता ।
सत्यास्तु पतितं तत्र विशीर्णं योनिमण्डलम् ॥७४॥
शिलात्वमगमच्छैले कामाख्या तत्र संस्थिता ।
संस्पृश्य तां शिलां मर्त्यो ह्यमरत्वमवाप्नुयात् ॥७५॥
अमर्त्यां ब्रह्मसदनं तत्स्थो मोक्षमवाप्नुयात् ।
तस्याः शिलाया माहात्म्यं यत्र कामेश्वरी स्थिता ॥७६॥
अद्भुतं यस्य गुह्ये तु लोहं भस्म भवेद्गतम् ।
सा चापि प्रत्यहं तत्र पञ्चमूर्तिधराभवत् ॥७७॥
मोहार्थं सर्वलोकानां ममापि प्रीतये शिवा ।
अहं पञ्चमुखेनाशु पञ्चभागे व्यवस्थितः ॥७८॥
ईशानः पूर्वभागस्थः कामेश्वर्याः प्रधानतः ।
ऐशान्यां वै तत्पुरुषो ह्यघोरस्तस्य सन्निधौ ॥७९॥
सद्योजातोऽथ वायव्यां वामदेवस्तु संगतः ।
देव्याश्चापि[14] नरश्रेष्ठ पञ्चरूपाणि भैरव ॥८०॥

१४. नो देव्याश्च ।

शृणु वेताल गुह्यानि देवैरपि सदैव हि ।
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा ॥८१॥
शारदाथ महालोका कामरूपगुणैर्युता ।
मयि लिङ्गत्वमापन्ने शिलायां योनिमण्डले ॥८२॥
सर्वे शिलात्वमगमच्छैलरूपाश्च निर्जराः ।
यथाहं निजरूपेण रेमे नै सह कामया ॥८३॥
शिलारूपप्रतिच्छन्नास्तथा सर्वास्तु देवताः ।
शिलारूपप्रतिच्छन्नाः शैले शैले व्यवस्थिताः ॥८४॥
रमन्ते च स्वरूपेण[15] नित्यं रहसि सङ्गताः ।
ब्रह्मा विष्णुर्हरश्चात्र दिक्पालाः सर्व एव ते ॥८५॥
अन्येऽप्यत्र स्थिता देवाः सानुकूलाः सदा मयि ।
उपासितुं तदा देवीं कामाख्यां कामरूपिणीम् ॥८६॥
नीलशैलस्त्रिकोणस्तु मध्यनिम्नः सदाशिवः ।
तन्मध्ये मण्डलं चारु त्रिंशच्छक्तिसमन्वितम् ॥८७॥
गुहा मनोभवा तत्र मनोभवविनिर्मिता ।
योनिस्तस्यां शिलायां तु शिलारूपा मनोहरा ।
वितस्तिमात्रविस्तीर्णा एकविंशाङ्गुलीयुता ॥८८॥
क्रमसूक्ष्मविनम्रा सा भस्मशैलानुगामिनी ।
महामाया जगद्धात्री मूलभूता सनातनी ॥८९॥
सिन्दूरकुंकामारक्ता सर्वकामप्रदायिनी ।
तस्यां योनौ पञ्चरूपा नित्यं क्रीडति कामिनी ॥९०॥
तत्राष्टौ योगिनीनित्या मूलभूताः सनातनीः ।
पूर्वोक्ताः शैलपुत्र्याद्याः स्थिता देव्याः समन्ततः ॥९१॥
तासां तु पीठानामानि शृणु चैकत्र भैरव ।
गुप्तकामा च श्रीकामा तथान्या विन्ध्यवासिनी ॥९२॥
कोटीश्वरी वनस्था तु पादुर्गा तथापरा ।
दीर्घेश्वरी क्रमादेव प्रकटा भुवनेश्वरी ॥९३॥
स्वयोगिन्यः पीठानाम्ना ख्याता अष्टौ च देवताः ।
सर्वतीर्थानि चैकत्र जलरूपाणि भैरव ॥९४॥

१५. शरीरेण ।

के. के. हास्पिटल 219049

स्थितानि नाम्ना सौभाग्यसरस्यल्पापि पुण्यदा ।
विष्णुस्तु तीरे तस्यास्तु नाम्ना कमल इत्युत ॥९५॥
कामुकाख्यस्तु बटुकः कामाख्याभ्यर्णसंस्थितः ।
लक्ष्मीः सरस्वती देव्यौ देव्याः संगे व्यवस्थिते ॥९६॥
ललिताख्याभवल्लक्ष्मीर्मातङ्गी तु सरस्वती ।
गणाध्यक्षः पूर्वभागे तस्य शैलस्य संस्थितः ॥९७॥
सिद्धः स नाम्ना विख्यातो द्वारे देव्याः प्रियः सुतः ।
कल्पवृक्षः कल्पवल्ली तिन्तिडी चापराजिता ॥९८॥
भूत्वा तस्मिन् महाशैले स्थितौ देव्या धृतः प्रिये ।
वराहः पाण्डुनाथाख्यः स्थितस्तत्र हरिर्यतः ॥९९॥
जघने शिरसी कृत्वा जघान मधुकैटभौ ।
तस्यासन्ने ब्रह्मकुण्डं ब्रह्मणा निर्मितं पुरा ॥१००॥
ईशानाख्यः शिवो यत्र तत् सिद्धेश्वरसंज्ञकम् ।
शिलारूपं सिद्धकुण्डं मध्यस्थं विधि[16] भैरव ॥१०१॥
तस्यासन्ने गयाक्षेत्रं क्षेत्रं वाराणसी तथा ।
योनिमंण्डलसंकाशं कुण्डं भूत्वा व्यवस्थितम् ॥१०२॥
तत्रैवामृतकुण्डं तु सुधासङ्घप्रपूरितम् ।
मम प्रियार्थमिन्द्रेण स्थापितं सह निर्जरैः ॥१०३॥
वामदेवाह्वयं शीर्षं श्रीकामेश्वरसंज्ञकम् ।
कामकुण्डं महापुण्यं तस्यासन्ने व्यवस्थितम् ॥१०४॥
केदारसंज्ञकं क्षेत्रं मध्यस्थं सिद्धकामयोः ।
दीर्घं चतुर्दशव्यामच्छायाच्छत्राह्वयं तु तत् ॥१०५॥
तस्यासन्ने शैलपुत्री गुप्तकामाह्वया तु सा ।
गुप्तकुण्डस्य मध्यस्था कामेशग्रावणि सङ्गता ॥१०६॥
कामेश्वरशिलासक्ता कामाख्यासंज्ञिता सदा ।
पूर्वभागेण संसक्ता योनेस्तु परमार्गतः[17] ॥१०७॥
कामकामाख्ययोर्मध्ये कालरात्रिर्व्यवस्थिता ।
पीठे दीर्घेश्वरी नाम्ना सीमाभागे अवस्थिता ॥१०८॥
कामाख्याप्रस्तरप्रान्ते कूष्माण्डी नाम योगिनी ।
पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता ॥१०९॥

१६. सिद्ध । १७. परभागता । १८. कामाख्या भैरवीमध्ये ।

यच्चाघोराह्वयं शीर्षं तत्कामायास्तु दक्षिणे ।
पीठे भैरवनामा तु गर्दिते परमार्थिभिः ॥११०॥
चामुण्डा भैरवी नाम्ना भैरवासन्नसंस्थिता ।
नायिका कामदा भक्तेश्चण्डमुण्डविनाशिनी ॥१११॥
कामाभैरवयोर्मध्ये[18] स्वयं देवी सुरापगा ।
हिताय सर्वजगतां देव्यास्तु प्रीतये सदा ॥११२॥
सद्योजाताह्वयं शीर्षं पीठे त्वाम्रातकेश्वरम् ।
भैरवाख्ये गह्वरे तु स्थितं देवर्षिसेवितम् ॥११३॥
विद्धि तत्रैव दुर्गाख्यां नायिकां योगरूपिणीम् ।
सिद्धकामेश्वरी नाम्ना ख्याता देवेषु नित्यशः ॥११४॥
अजीर्णपत्रः सुच्छायो वृक्षस्तत्र सुसंस्थितः ।
आम्रातकः कल्पवृक्षः कल्पवल्लीसमन्वितः ॥११५॥
पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता ।
आम्रातकस्य निकटे मम प्रीतिविवृद्धये ॥११६॥
पुष्कराख्यं तु तत्क्षेत्रं पीठे त्वाम्रातकाह्वयम् ।
ऐशान्यां तत्पुरुषाख्यं मम शीर्षं व्यवस्थितम् ॥११७॥
भुवनेश्वरनाम्ना तु पीठे ख्यातं च भैरव ।
गह्वरं भुवनेशस्य भुवनानन्दसंज्ञकम् ॥११८॥
तस्यासन्ने तु सुरभिः शिलारूपेण संस्थिता ।
कामधेनुरिति ख्याता पीठे कामप्रदायिनी ॥११९॥
योऽसौ शरभमूर्तिर्मे मध्यखण्डप्रचण्डकः ।
महाभैरवनामाभूत् कोटिलिङ्गाह्वयस्तु सः ॥१२०॥
मूर्तिभिः पञ्चभिः पञ्चभागेषु समवस्थितः ।
अहं पश्चादतिप्रीत्या भैरवाख्यः स्थितो धरे ॥१२१॥
महागौरी तु या देवी योगिनी सिद्धरूपिणी ।
सा ब्रह्मपर्वते चास्ते शिलारूपेण चोर्ध्वतः ॥१२२॥
अतीवरूपसम्पन्ना नाम्ना सा भुवनेश्वरी ।
यत्र ब्रह्मा तु संसक्तो मयि पर्वतरूपिणि ॥१२३॥
कल्पवल्ली तु तत्रास्ते नाम्ना सा त्वपराजिता ।
कामधेनुरदूरस्था पूर्वभागे महेश्वरी ॥१२४॥
श्रीकामाख्या योनिरूपा चण्डिका सा तु योगिनी ।

आग्नेय्यां विद्धि तां संस्थां सर्वकामप्रदां शुभाम् ॥१२५॥
योगिनी चन्द्रघण्टाख्या पीठेऽभूद् विन्ध्यवासिनी ।
योगिनी स्कन्दमाता तत्पीठेऽभूद् वनवासिनी ॥१२६॥
कात्यायनी पीठनाम्ना पाददुर्गेति गद्यते ।
नैर्ऋत्यां नीलशैलस्य प्रान्ते सा संस्थिता शिवा ॥१२७॥
योऽसौ नन्दी मम तनुः स तु पाषाणरूपधृक् ।
संस्थितः पश्चिमद्वारि हनुमान् पीठनामतः ॥१२८॥

और्व्व उवाच

इति तस्य वचः श्रुत्वा शम्भोरमिततेजसः ।
भैरवस्तं तु पप्रच्छ वेतालोऽपि समुत्सुकः ॥१२९॥

वेतालभैरवावूचतुः

श्रुतः पीठक्रमस्तात देव्याः पूजाक्रमस्तथा ।
श्रोतुमिच्छामि मूर्तीनां पञ्चानामपि शङ्कर ॥१३०॥
रूपाणि पञ्चमूर्तीनां मन्त्राणि च समन्ततः ।
तत्र मन्त्राणि[१९] तन्त्राणि वद नौ वृषभध्वज ॥१३१॥

श्वर उवाच

शृणु वक्ष्यामि वेताल मन्त्रं तन्त्रं पृथक् पृथक् ।
कामाख्यापंचमूर्तीनां रूपं कल्पं च[२०] भैरव ॥१३२॥
कामस्थं कामामध्यस्थं कामदेवपुटीकृतम् ।
कामेन कामयेत् कामी कामं कामे नियोजयेत् ॥१३३॥
ज्येष्ठं तु व्यञ्जनं ब्रह्मन् परः शान्तं तदुच्यते ।
प्रथमं क्रमतः कुर्यात्तत्संसक्तं सुधामयम् ॥१३४॥
प्रजापतिस्तथा शक्रबीजं संस्थादिसंयुतम् ।
चन्द्रार्धसहितं बीजं कामाख्यायाः प्रचक्ष्यते ॥१३५॥
इदं धर्मप्रदं काममोक्षार्थानां प्रदायकम् ।
इदं रहस्यं परमन्यत्र तु सुदुर्लभम् ॥१३६॥
श्रोत्रेणोद्यम्य शृणुयाद् गुरुवक्त्रान्नरोत्तमः ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥१३७॥

१९. यन्त्राणि । २०. कामं रूपं च ।

श्रुतिसकलितसारं देवकण्ठौघहारं
सकलकलुषहारि श्रीधरानन्दकारि ।
सुनयशुभगगेभिर्भ्राजियेद्यद्यशोभि-
स्तदिह शिवसमस्तं विघ्नहन्त्रीङ्गितार्थम् ॥१३८॥
नयनकरभकारि ध्यानिनां चोपकारि
प्रणयिसुनयसंस्थं देवसत्याह्निकस्थम् ।
परमपदविशीर्णं सर्वदौर्भाग्यजीर्णं[२१]
शृणु शिवपदरूपं कामदेव्याः स्वरूपम् ॥१३९॥
श्रवणगगनमात्रा चार्दितं यस्य नाम
प्रभवति बहुभूत्यै गीतामार्गैकधाम ।
सुरगणगणनायां कुण्डली यस्य शक्ति—
स्तदिह परमरूपं चिन्तनीयं हतार्त्तैः[२२] ॥१४०॥
रविशशियुतकर्णा कुंकुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥१४१॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुंगस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवक्त्रा सर्वकामेश्वरी सा ॥१४२॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
ललितनखरदन्ता सामिचन्द्रावतंसा ।
मनसिजदृषदिस्था योनिमुद्रालसन्ती
पवनगमनशक्ता संश्रुतस्थाबभासा ॥१४३॥
चिन्त्या चैवं विद्युदग्निप्रकाशा
धर्मार्थाद्यं साधकैर्वाञ्छितार्थैः ।
कल्प्यन्त त्रीण्यस्तदं सम्यगर्घं
वेताल त्वं भैरव श्रीप्रतिष्ठम् ॥१४४॥

२१. शुद्धं । २२. कृतीशैः ।

तस्मिन्नर्घं[२३] मण्डलं यद्धि पश्चात्
कार्यं चेतच्चन्दनैः पुष्पयुक्तैः ।
पर्यायो यो लेखने पूर्वमुक्तो
देवीतन्त्रे सोऽत्र पूर्वं विधेयः ॥१४५॥

इति श्रीकालिकापुराणे कामाख्या-माहात्म्यम् समाप्तम् ।

२३. तस्मिन्नाद्यं ।

श्लोकानुक्रमणी

श्लोकपादः	प० सं०	श्लोकपादः	प० सं०
	अ		
अखण्डमण्डलाकारं	5.9	अतः शुद्धं जगत् सर्वं	7.18
अग्निः स्तम्भति वायुश्च	2.8	अथास्याः साधनं देवि	2.14
अचलधनसमहस्तस्थ	6.35	अद्वैतभावयुक्ताय	10.29
अचलशिखररम्ये	6.29	अनुग्रहश्च देव्याश्च	9.23
अचिराद् रौरवं याति	3.63	अनुष्ठानविधिं वक्ष्ये	8.16
अचिरात् सिद्धिमाप्नोति	3.61	अन्धं खञ्जं तथा रुग्नं	8.101
अज्ञात्वा पापिनो देवि	3.44	अन्यथा च महानिन्दा	6.9
अज्ञानतिमिरान्धस्य	5.25	अभयवरकराढ्यां	4.19
अज्ञानाद् यदि वा ज्ञानात्	8.103	अभिनवशुभनीरं	6.31
अज्ञानाद् यदि वा मोहात्	3.3	अभिषिक्तः शिवः साक्षात्	8.109
अज्ञानाद् यदि वा मोहात्	8.103	अभिषिञ्चन्तु सततं	8.66
अज्ञानाद यदि वा मोहात्	5.68	अभिषिञ्चेद्गुरुः शिष्यं	8.33
अतएव गुरुर्नैव	5.6	अमेयविक्रमाख्या सा	10.8
अत एव महेशानि	5.8	अर्चितं पशुभावेन	5.55
अति गुप्तालये शुद्धे	8.4	अलक्ष्मीः कालरात्रिश्च	8.84
अति गुह्यतमं देवि	7.2	अवश्यं ब्राह्मणो नित्यं	6.15
अति सुललितवेशां	4.19	अशुद्धं तत् कथं देवि	7.17
अति सुललित दिव्यं	6.26	अश्रुतं मुक्तितत्त्वं हि	9.26
अतो देव्याः साधने तु	6.7	अश्रुतं संवृतं वाक्यं	5.29
अतो यो ज्ञानदातारं	5.19	अस्यैव जननी धन्या	6.20
अतोहि मनुजं लुब्धं	5.15	अक्षोभ्यश्च ऋषिः प्रोक्तः	3.8
	आ		
आकर्षणञ्च नारीणां	2.7	आज्ञां गृह्णातिधनदः	4.38
आगत्य सद्गुरुं	8.3	आत्मनश्च गुणाश्चैव	8.71

आनन्दं वर्द्धते नित्यं	4.33	आवृणोति स्वयं लक्ष्मीः	4.10
आवाहयेत् ततो देवीं	3.18		

इ

इति ज्ञात्वा साध केन्द्र	5.26	इत्यादि बहुधा चाराः	5.69
इतिचपरमदेव्याः	6.34	इत्यादयाः पशवः	5.52
इति ते कथितं गुह्यं	8.118	इदन्तु सेचनं देवि	8.116
इति देव्या वचः	5.3	इन्द्रादया देवताः सर्वाः	4.2
इत्यादिगुणसम्पत्तिः	5.32	इष्टे निश्चल सम्बन्धः	9.20
		इह च गुरुवराज्ञां	6.33

उ

उक्तानि यानि यानि	8.114	उत्पादी जायते शत्रु	7.12
उत्तिष्ठ ब्रह्मकलस	8.32	उपवन्न परियुक्ते	6.28
उदासीनं विशेषेण	8.102		

ऋ

ऋतुं विना स्त्रिया देवि	6.6	ऋतुस्नातां विना नारीं	5.61

ए

एतत् तु कथितं स्नेहात्	10.24	एते त्वामभिषिञ्चन्तु	8.78
एतत्तु तिगुणीकृत्य	2.11	एते त्वामभिषिञ्चन्तु	8.81
एतास्तामभिषिञ्चन्तु	8.44		

ऐ

ऐश्वर्यं प्रार्थयेन्नैव	5.64		

ॐ

ॐ अश्वारुढा महादेवी	8.41	ॐ जम्बुद्विपादयो द्वीपाः	8.80
ॐ असितांगो रुरुश्चण्डः	8.65	ॐ दक्षिणामूर्ति ऋषिः	8.35
ॐ इन्द्रोऽग्निश्चयमश्चैव	8.60	ॐ नक्षत्रकरणं योगः	8.63
ॐ उग्रचण्डा प्रचण्डा च	8.46	ॐ पुरुष प्रकृतिश्चैव	8.70
ॐ उग्रदंष्ट्रा सुदंष्ट्रा च	8.47	ॐ ब्रह्मा विष्णुश्च रुद्रश्च	8.69
ॐ गंगागोदाबरी रेवा	8.75	ॐ भैरवी भीमरूपश्च	8.77
ॐ गंगाद्याः सरितः सर्वाः	8.26	ॐ मंगलानन्दिनी भद्रा	8.49
ॐ चक्री जयावती ब्राह्मी	8.53	ॐ यानि कानि च तीर्थानि	8.79
ॐ छिन्नमस्ता महाविद्या	8.39	ॐ रतिश्च वल्लभा चन्द्रे:	8.82

ॐ रविः सोमः कुजः सौम्यः	8.62	ॐ वेदादिवीजं श्रीवीजं	8.72
ॐ रौद्रराजेश्वरी शक्तिः	8.36	ॐ वैवस्वती च कौमारी	8.58
ॐ रौद्री काली च मायूरी	8.56	ॐ सम्वत्सरीत्यन श्च	8.61
ॐ विजया मंगलभद्रा	8.51		

क

कटाक्षैश्च महासम्पत्	3.13	कार्पण्यं नैव कर्तव्यं	5.65
कदाचिद्दीक्षयेन्नैव	5.67	कालिका तारिणी दीक्षा	6.10
करतोया चन्द्रभागा	8.76	कालीतारामन्त्रदाने	3.1
करवीरस्य माहात्म्यं	3.21	कालीतारामनूं प्राप्य	6.13
करवीर प्रसूनञ्च	4.31	किं चित्रं कथितं नाथ	5.54
करवीरेषु देवेशि	3.20	किं तु भाव्यं हितैषित्वं	5.42
कलौ तु सर्वशाक्तानां	6.2	किं तस्य जपपूजाभिः	8.104
कल्पकोटिशतं देवि	8.105	किं ब्रूमो योनिमाहात्म्यं	3.66
कर्पूरपूरितमुखः	4.24	किं शाक्ता वैष्णवाः किं वा	2.13
कर्मणा गर्हितेन	5.35	कुंकुमाद्यैं रक्तपुष्पैः	3.19
कल्यन्ते च महादेवि	3.4	कुंकुमाद्यैरासवेनः	3.32
कस्याः देव्याः साधकेन	6.1	कुलद्रव्येषु या भक्तिः	9.24
कामवीजेन संप्रोक्ष्य	8.24	कुलाचारस्य माहात्म्यं	6.23
कामाख्या काम सम्पत्ति	1.10	कुर्यास्तु कपटं नाथ	10.2
कामाख्यां न विना किंचित्	1.14	कुष्माण्डानां भयं	10.20
कामाख्याया महादेव्याः	1.13	कृतार्थं कुरु मे नाथ	8.7
कामाख्यामन्त्रमासाद्य	4.4	कृत्वा संकल्पमित्यस्य	10.12
कामाख्या या महादेवी	10.1	कृते च नरकं यान्ति	2.15
कामाख्या साधनं कार्यं	2.12	कृष्णवर्णां सदा काली	10.11
कायेन मनसा वाचा	8.93	केचिच्छागोपमा देवि	5.51
कायेन मनसा वाचा	5.34	केवलं शिष्यसम्पत्तिः	5.33
		क्रोड़े तस्य वसन्तीह	7.20

ग

गम्भीरः शिष्टवक्ता	5.45	गुरवो बहवः सन्ति	5.24
गन्धाद्यैं साधकाधीशः	3.50	गुरुतन्त्रं महादेव	5.1
गाणपत्यं च वाराहं	8.74	गुरुश्च भैरवः साधुः	8.94

गुरुः सदाशिव प्रोक्तः	5.4	गोपनीयं गोपनीयम्	5.79
गुह्याद् गुह्यतरं देवि	4.21	गोपितं सर्वतन्त्रेषु	4.22
	च		
चक्रालयान्तिः सरेत्न	8.14	चर्चिका चापरा ज्ञेया	8.57
चतुरस्रं लिखेद् देवि	3.7	चिन्तामणिमहाबीजं	8.73
चन्द्रकान्तिर्यथा देव	1.16		
	ज		
जगज्जयति मन्त्रज्ञ	2.9	ज्ञानं यत्र समाभाति	5.20
जम्बुद्वीपादयो द्वीपाः	8.83	ज्ञानं हि परमं वस्तु	5.22
जम्बुद्वीपे कलौ देवि	5.71	ज्ञानाद् धर्मो भवेत्	5.21
जयति यतमानः	6.27	ज्ञानान् मोक्षो भवेत्	9.12
जृम्भणान्तं त्यक्तपाशं	2.10		
	ड		
डाकिनी योगिनी विद्या	3.14	डाकिन्याद्यस्तथा	3.37
	त		
तं तं काममवाप्नोति	10.13	तथा नाना शुभा दीक्षा	9.11
तं तं कामं करे कृत्वा	3.48	तथात्र सिद्धय सर्वाः	10.15
ततोऽभिषिच्य तत्त्वानि	8.8	तथा मुक्तिरसौ देवि	10.10
ततो गुरोः प्राप्तमन्त्रं	8.90	तथा मुग्धी कृता लोके	9.4
ततोहि पशवश्छेद्याः	5.53	तद् दशांशं हुनेदाज्यैः	3.49
ततो लिंगे स्थिते योनौ	4.28	तदा योग्या भविष्यामः	6.22
ततोहि शिवभक्तेभ्यः	8.22	तथा विद्या प्रसन्ना स्यात्	5.40
ततः शंखादिवादैश्च	8.23	तदेव जीवनं तस्या	3.58
ततः शिष्यो गुरुं देवीं	8.91	तत्रैव ग्राहका हिंसाः	5.17
ततः शिष्यं समानीय	8.20	तत्रैव सद्गुरु कोवा	5.2
ततो हितं महाशुद्धं	8.106	तत्र देवीं यजेदधीमान्	3.54
तत्त्वमयः सदावीरः	5.49	तस्मात् पशु गुरुस्त्याज्यः	5.38
तन्मध्ये कालिका तारा	6.3	तस्य नाम च संस्मृत्य	4.12
तथा भगन्दरी देवी	8.42	तस्याचारं वदभ्याशु	5.60
तथा त्रिदिवसं प्राप्य	8.95	तस्यैव सफलं जन्म	8.101

तस्यैव सफलो धर्मः	8.111	तेजोनाशी बुद्धिनाशः	8.87
तस्य क्रोडे वसन्तीह	8.113	त्रिकुरा त्रिपुटा देवी	8.37
तस्या यो नौ यजेद्देवीं	4.36	त्रिकोणेषु त्रयो देवाः	3.64
ताम्बूलादिकराभिश्च	3.15	त्रिनेत्रा सम्मोहंकरां	3.16
ताम्रेण निर्मितं वापि	8.17	त्रिरातावेव सिदध्यन्ति	3.60
ताम्रपात्रोदकैर्देवि	8.96	त्रिपुरा नन्दिनी देवी	8.38
	द		
दद्यात् शान्ताय शुद्धाय	10.28	दिनानि त्रीणि संवाप्य	8.15
दन्तक्षति वितनाश्च	4.25	दिव्यतो वीरतो देव	5.43
दर्शकः पठनश्चैव	5.12	दिव्यत्वं लभते किं वा	5.7
दर्शनात् साधकाधीशः	3.57	दीप्तिः कान्तिर्यशो लक्ष्मीः	8,52
दर्शनेभ्यो निवर्तन्ते	9.8	दीक्षा ही सफला देवि	8.112
दर्शनेषु तथा मुक्तिः	9.7	दुर्गाक्रियारुन्धतौ	8.55
दश दिक्षु महापीठे	7.5	दृष्ट्वा श्रुत्वा महेशानि	7.7
दाम्भिकाय च दातव्यं	10.27	देव दानव गन्धर्व	2.3
दारिद्रचनाशनं देवि	4.18	देवत्वं सर्वदेवानां	1.12
दिनत्रयं महावीर	4.29	देवालये सदा तिष्ठेत्	5.63
दिनत्रयं ततो देव्याः	4.32		
	ध		
धनधनितसुशोभे	6.32		
	न		
नखघातैर्नितम्बे च	4.26	नानावस्त्रैरलंकारैः	8.92
न चोत्पातभयं तस्य	10.18	नानुकल्पः क दुर्गे	5.74
न तु गुरुः स्वयं	5.11	निखाते धनमारोप्य	8.120
न दद्यात् खञ्जकाणेभ्य	10.26	निखिलजनविलासां	4.20
नश्यन्तु तत्क्षणेनैव	3.27	निखिलासु च विद्यासु	1.7
नश्यन्तु विपदः सर्वाः	8.89	निजबीजत्रयं देवि	4.5
न सारः कदली वृक्षे	9.6	नित्यं तस्य महेशानि	4.35
नाना पुष्पाणि माल्यानि	8. 9	निन्दासु तारयेल्लोकान्	5.59
नानालंकार वस्त्राणि	8 8	निमन्त्र्यं निक्षिपेद्देशे	3 4

निर्भयो भयदो वीरः 5.47
नीलोत्पलदलश्यामां 9.18

प

पञ्चतत्त्वेन देव्यास्तु 3.23
पञ्चतत्त्वं भुक्तिमुक्तः 3.26
पञ्चतत्त्वं महादेवी 3.25
पञ्चतत्त्वं समं देवि 3.24
पञ्चतत्त्वविहीने तु 3.28
पञ्चतत्त्वैः कलौ देवि 6.16
पञ्चवक्त्रं न गृह्णाति 5.58
पठेत् स्तोत्रं च कवचं 3.39
परनिन्दां परद्रोहं 5.66
परमार्थे सदादृष्टिः 5.31
परलोक विधानेन 8.21
परस्त्रीयोनिमासद्य 3.59
परिचरति स साधुः 6.30
पल्लवैराम्रकैश्चैव 8.34
पशुभावे स्थिते योहि 5.37
पशून्शृणु बरारोहे 5.50

ब

बभूवुश्च भविष्यन्ति 9.22

भ

भक्तियुक्तो यजेद् देवीं 3.31
भगवान् सर्व धर्मज्ञ 1.1
भञ्ज भञ्जाशु सन्देहं 5.56
भद्रयुक्तं त्वया विज्ञे 5.57

म

मत्स्येन भैरवीपुत्र 3.30
मद्यैर्मांसैस्तथा मत्स्यैः 6.8
मधुभि. सर्ववर्णैश्च 5.73
मधुलुब्धो यथा भृंगो 5.23
नृत्यन्ति पितरः सर्वे 6.21

प

पशोरग्रेविशेषेण 10.25
पावनानीह तीर्थानि 6.19
पार्श्वयोः कमलां 3.34
पुत्रदारादिभिर्युक्तैः 8.100
पुनर्लिंगे स्थिते योनौ 4.34
पुरश्चर्याविधे किं तु 4.16
पूजयित्वा महादेवीं 7.3
पूजयेदम्बिकां देवीं 3.22
पृथिव्यां सर्व तीर्थेषु 4.11
पूर्वोक्तदोषयुक्तस्य 5.41
प्रणवाद्या महाविद्या 4.7
प्रणमेद्विविधैर्भक्त्या 8.6
प्रयोगेषु ततो देवीं 3.52
प्रवालादीन् पञ्च 8.25
प्रसिद्धमितियद्देवि 5.10
प्रसीदेति पदञ्चैव 4.6

ब

ब्रह्मज्ञानी शिवः साक्षात् 7.19

भ

भीमनेत्रा विशालाक्षी 8.48
भुञ्जीत मत्स्यामांसाद्यैः 8.12
भूतप्रेतपिशाचानां 10.19

म

मनो लयात्मिका भुक्तिः 9.16
मन्त्रग्रहणमात्रेण 4.9
मन्त्रदातुः शिरः पद्मे 5.7
मन्त्रोद्धारं प्रवक्ष्यामि 2.1

मन्त्रस्यास्य प्रभावेन 2.2
मन्त्रस्य पुरतो देवि 2.4
ममतुल्यो विष्णु तुल्यः 8.117
महाज्ञानो स कौलेन्द्रः 8.99
महादेव जगद् वन्दय 8.1
महाप्रीतिकरी पूजा 3.53
महाविद्यां समादाय 5.36
महोत्साहो महाबुद्धिः 5.48
मातंगी चान्नपूर्णा च 8.45
मातणां च तथा पुत्राः 8.68

य

यत् प्रसादात् समागत्य 4.3
यथा कल्पतरुर्दाता 10.14
यया दीक्षां विना देवि 6.4
यथा पशुं परित्यज्य 8.108
यथा भोक्तरि भोज्यं 5.13
यथा रतिर्गोपनीया 8.119
यथा शक्ति जपेन्मन्त्रं 3.38
यदि चंक्रमणे शक्तिः 5.70

र

रक्तवस्त्रां वरोदयुक्तां 3.10
रमणी चैव सर्वेषां 1.6
रमाबीजेन जप्तेन 8.28

ल

लंघितुं नैव शक्नोति 5.78
ललनयैव सिंदूरं 8.29

व

वदेयुः कर्मकर्तुश्च 8.13
वयमग्निश्च कालोऽपि 3.2
वरदानन्ददा नित्या 1.5
वरदा मोहदा देवि 3.35
वरमन्त्रं प्रवक्ष्यामि 4.1
वर्णितुं नैव शक्नोमि 4.15
माया चैव महामाया 8.54
माया बीजं महेशानि 7.10
मिष्ठान्नैः साधकान् 3.15
मुक्तितत्त्वं महादेव 9.1
मृत्पात्रं तत् समादाय 7.9
मूत्रसाधन मात्रेण 7.13
मोदकेन यथालोकः 9.3
मोह्यो ह्यगरं राज्ञः 2.5
मोक्षदा सुखदा चैव 3.36

य

यदि दैवात् पशोर्दीक्षां 5.39
यदि निन्द्यश्च तत् पात्रं 5.14
यदि भाग्यवशाद् देवि 9.25
यमदूताः पलायन्ते 10.22
या देवी कलिकामाता 10.4
योग्यं गुरुं तथा शिष्यं 8.115
योनिनिन्दां प्रकुर्वाणः 3.65
योनिपूजा समापूज्या 3.56
योनि वीक्ष्य जपेन्मन्त्रं 4.37

र

राजस्वं दीयते राज्ञे 5.61
रोगाशोकपातकानां 10.17
रोगः शोकाश्च दारिद्र्यं 8.85

ल

लीयते पुनरस्याश्च 10.7
लेपयेत् तां सुगन्धाद्यैः 3.54
लोकानुरागत्यागश्च 8.86

व

वस्त्रभूषादिभि र्देवीं 3.33
वाणी लक्ष्मी सुधा-वाक्य 3.17
वारवेला कालवेला 8.64
विचरेत् सर्व शास्त्रेषु 9.9
विचारयन्ति चोत्सुकाः 1.06

वितानैर्ध्वपदीपैश्च	8.9
विना कामात्मिकां क्वापि	1.9
विना तत्साधनं देवि	3.62
विशिष्टात् कौलिकात्	8.5
विश्वम्भरी क्रिया शक्तिः	10.9
विषापमृत्युरोगश्च	8.88
श	
शक्तिभ्यो भैरवेभ्यः	8.97
शक्तिमूलं तपः सर्वं	3.43
शक्तिमूला गतिश्चैव	3.42
शक्त्युच्छिष्टं भक्षितव्यं	3.45
शरीरं साधनं यत्तु	9.10
शाकिनी पुत्रका भूयो	8.67
शान्तोदान्तः कुलीनश्च	5.27
शिलायां शस्यवापैश्च	6.5
शिवदूती च चामुण्डा	8.59
शिष्यबोधायनिपुणः	5.30
शुक्रशोणितमूत्राणि	7.14
शुक्रशोणितमूत्रेषु	7.6
शुक्रंतु स्तम्भयेद्वीरः	4.27
शुद्धं सर्वशरीरं तु	7.16
स	
स एव धार्मिकः साधुः	6.18
संत्यजेन्मत्स्यमांसानि	5.62
सत्ये क्रमेश्चतुर्वर्णं	5.72
सत्यं सत्यं पुनः सत्यं	1.17
सत्यमेतत् सत्यमेतत्	5.75
सनातनं परं ब्रह्म	5.5
सनातनी जगन्माता	9.19
[illegible]	3.46
सफलं हि सदा कर्म	8.107
विहरेत पञ्चतत्वेन	3.41
वीरत्वं क्लेशतो देवि	5.77
वीराचारं महेशानि	7.7
वैदिकी तांत्रिकी संध्या	6.11
व्यक्तिर्लयात्मिका मुक्तिः	9.15
शुभचक्रं विनिर्माय	8.11
शूनीमूत्रसमं तस्य	6.12
शृणु कामकले कान्ते	6.25
शृणु देवि प्रवक्ष्यामि	1.4
शृणु देवि रहस्यं च	7.15
शृणु देवि मम प्राण	8.2
शृणु देवि शुभे विश्वे	9.2
शृणु देवि जगद् वन्दचे	5.44
शैवानां वैष्णवानां च	3.29
श्रीनन्दा च सुनन्दा च	8.50
श्रुतं रहस्यं देवेशि	8.98
श्रुतं रहस्यं देवेश	7.1
श्रुतानि सर्वतन्त्राणि	1.2
श्रुत्वैतत् गिरिजा वाक्यं	10.3
ष	
षड्दर्शनमहाकूपे	9.5
स ब्राह्मणो वैष्णवश्च	6.17
सभायां कोटिसूर्याभं	4.14
समाप्य महतीं पूजां	8.10
सम्यग् लयो जनस्यैव	9.14
सम्पत्तिरचना तित्र	10.23
स याति नरकं घोरं	3.47
सर्वदर्शी सर्ववक्ता	5.46
सर्वसिद्धिकरं [illegible]	1.18
सर्वसिद्धिकरी देवी	8.43

सर्वेषां भुवने सत्यम्	5.18
साधकानां परिचर्यया	4.13
साधनं वद कौलानां	6.24
साधूनां देवदेवेशि	9.21
सारात् सारतरं तन्त्रं	1.3
सारात् सारतरं देवि	1.15
सारूप्यं सहयोज्यं च	9.13
सालोक्यं सहरूपं च	1.11
सालोक्यं केवलं तत्तु	9.17
सिद्धो भवति मन्त्रज्ञः	4.17
सिद्धोऽसाविति	5.28
ह	
हठाद्हठाच्च देविशि	3.5
हरिंताख्या महादेवी	8.40
हरिहरविधि वन्द्या	4.20
सिन्दूरमण्डलं कृत्वा	3.6
सैव ब्रह्मेति जानीहि	10.5
स्तम्भनं मोहनं देवि	2.6
स्मरणादेव मन्त्रस्य	4.8
स्वतन्त्रोक्तविधानेन	8.31
स्वमूत्रञ्च समादाय	7.11
स्वमूत्रं तु समुदाय	7.4
स्वर्णादिमणिमणिक्य	3.11
स्वर्गे मर्त्ये च पाताले	10.21
स्वयम्भुकुसुमेनैव	4.23
हास्यवक्त्रां पद्मराग	3.12
ह्रूँफट् स्वाहेति	8.30
ह्लदा प्रसवनाः पुण्याः	8.27
क्ष	
क्षत्रियोऽपि तथा देवि	6.14

संशोधनपत्रम्

(केचन गुरुमुद्रणप्रमादाः लघुप्रमादा उपेक्षिताः)

अशुद्धम्	शुद्धम्	पंक्तौ	पृष्ठे
भगवान्	भगवन्	1	1
तस्यः	तस्य	25	3
1	2	6	4
कल्यान्ते	कल्पान्ते	9	4
कथितु	कथितुं	19	5
सत्स्येन	मत्स्येन	9	6
हुतेत्	हुनेत्	21	7
यावत्रयः	यावतयः	3	10
तस्याधरो	तस्याधरं	28	10
भङ्गो	मृङ्गो	28	10
श्रेष्ठ	श्रेष्ठः	3	12
पठनस्मैव	पठनञ्चैव	3	13
सद्गुरु	सद्गुरु	14	14
दत्वाचा	दत्वाचारं	6	15
क्षतयमेतचिछ	सतयमेदिघ	11	18
साधकानमे···	साधकानामेकान्त···	23	18
पञ्चतत्त्वन	पञ्चतत्रेन	24	18
मदयैमांसै···	मदयैर्मांसै···	11	19
संभय	संभयं	26	19
वक्र	वक्त्र	8	20
कुलज्ञनी	कुलज्ञानी	8	20
सांम्व...	सम्विभाव्यै···	20	20
श्रीगुरु···	श्रीगुरुं	5	21
विद्युदयदीप्त···	विद्युदाभीप्ति	15	21
···फर···	·· फल···	25	21
मृत्पात्रन्त	मृत्पातन्तु	25	22

तत्	तत्र	26	22
ध्रवम्	ध्रुवम्	17	23
ब्राह्मणे	ब्राह्मणी	22	23
निर्विघ्नञ्चेति	निर्विघ्नञ्चेति	4	25
चलतः	जलतः	27	25
शरण्यम्बुधि···	शरण्याम्बुधि	6	28
मातृणां	मातृणां	6	29
मनषा	मनसा	1	31
सार्धं	सार्धं	3	31
···कमणः	कर्मणः	12	31
पञ्चवक्त्रैश्च	पञ्चवक्त्रैश्च	26	32
गोपनीयं	गोपनीयं	28	32
मुक्तिरसौ	मुक्तिरसौ	7	36
···मणिदेवि	मणिर्देवि	14	36
···तित्र	···स्तत्र	5	37
···चन्न	त्तन्न	6	37
चिरत्	चिरात्	25	38
···स्त्र	स्तत्र	28	38
पाठवरे	पीठवरे	28	45
पर्वतरूपिणी	पर्वतरूपिणि	3	46
पर्वतरूपिणी	पर्वतरूपिणि	9	46
सर्वत	पर्वत···	13	46
सार्धं	सार्धं	7	47
क्षत्रं	क्षेत्रं	3	49
समवक्रा ···	समवक्त्रा	6	52
·· दषदिस्या	दृषदिस्था	9	52
विधयः	विधेयः	18	52